काव्यमाला ६.

महाकविश्रीशेषकृष्णप्रणीतं

कंसवधम् ।

मुम्बय्यां निर्णयसागरयन्त्रालये मुद्रयित्वा प्रकाशितः ।

KĀVYAMĀLĀ. 6.

THE

KAMSAVADHA

OF

ŚEṢAKṚIṢṆA.

EDITED BY

MAHĀMAHOPĀDHYĀYA PAṆḌIT DURGĀPRASĀDA

AND

KĀS'ĪNATH PĀṆḌURANG PARAB.

REVISED BY

WASUDEV LAXMAṆ S'ASTRI PAṆS'IKAR.

Third Edition.

PUBLISHED

BY

PANDURANG JĀWAJĪ,

PROPRIETOR OF THE 'NIRṆAYA SĀGAR PRESS,

BOMBAY.

1935.

[All rights reserved by the publisher.]

Publisher :-Pandurang Jawaji, } Nirnaya Sagar Press,
Printer :-Ramchandra Yesu Shedge, } 26-28, Kolbhat Lane, Bombay.

काव्यमाला ६.

महाकविश्रीशेषकृष्णप्रणीतं

कंसवधम् ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना महामहोपाध्याय-
पण्डितदुर्गाप्रसादेन, मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मज-
काशीनाथशर्मणा, पणशीकरोपाह्वलक्ष्मणशर्मात्मज-
वासुदेवशर्मणा च संशोधितम् ।

तृतीयं संस्करणम् ।

तच्च

मुम्बय्यां

पाण्डुरङ्ग जावजी इत्येतैः,
स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्राकाश्यं नीतम् ।

शाकः १८५७, खिस्ताब्दः १९३५.

काव्यमाला ।

महाकविश्रीशेषकृष्णप्रणीतं

कंसवधम् ।

प्रथमोऽङ्कः ।

प्रारम्भः शुभकर्मणस्त्रिभुवनक्लेशामिचारागमः
कान्ताकर्षणकर्मकार्मणविधिः कामाद्वितीयश्रुतिः ।
हुंकारो मदनस्य निर्वृतिवधूमञ्जीरशिञ्जाध्वनिः
श्रेयः संपदमातनोतु भवतः कंसारिवंशीरवः ॥ १ ॥

अपि च ।

वृन्दारण्ये चरन्ती विभुरपि सततं भूर्भुवःस्वः सृजन्ती
नन्दोद्भूताप्यनादिः शिशुरपि निगमैर्लक्षिता वीक्षितापि ।
विद्युल्लेखावनद्धोन्नमदमलमहाम्भोदसच्छायकाया
माया पायादपायादविदितमहिमा कापि पैताम्बरी वः ॥२॥

---

१. अयं महाराष्ट्राभिजनः शेषोपनामको नृसिंहसूनुः श्रीकृष्णकविः कस्यामकबरबादशाहराज्यसमये खिस्ताब्दीयषोडशशतकस्योत्तरभाग आसीत्. एतन्नाटकं चानेनाकबरसन्त्रिणो राजाटोडरमल्लनाम्नः पुत्रस्य गोवर्धनधारीत्यपरनाम्नो गिरिधारिणः प्रेरणया प्रणीतम्. अनेनैव कविना काशीपरिसरवर्तिताण्डवपुरनृपतेरनुजन्मनो नरोत्तमस्याभ्यर्थनया पारिजातहरणचम्पूरपि निरमायि. नाटकस्यास्य मुद्रणमस्माभिः पुस्तकद्वयाधारेणारब्धमस्ति. तत्र प्रथमं पुस्तकं प्रायःशुद्धमन्तिमपत्ररहितं शतवर्षप्राचीनमिवोपलक्ष्यमाणं जयपरराजवैद्यश्रीकृष्णरामकवेः

काव्यमाला ।

महाकविश्रीशेषकृष्णप्रणीतं

कंसवधम् ।

प्रथमोऽङ्कः ।

प्रारम्भः शुभकर्मणस्त्रिभुवनक्लेशाभिचारागमः
कान्ताकर्षणकर्मकार्मणविधिः कामाद्वितीयश्रुतिः ।
हुंकारो मदनस्य निर्वृतिवधूमञ्जीरशिञ्जाध्वनिः
श्रेयः संपदमातनोतु भवतः कंसारिवंशीरवः ॥ १ ॥

अपि च ।

वृन्दारण्ये चरन्ती विभुरपि सततं भूर्भुवःस्वः सृजन्ती
नन्दोद्भूताप्यनादिः शिशुरपि निगमैर्लक्षिता वीक्षितापि ।
विद्युल्लेखावनद्धोन्नमदमलमहाम्भोदसच्छायकाया
माया पायादपायादविदितमहिमा कापि पैताम्बरी वः ॥२॥

---

१. अयं महाराष्ट्राभिजनः शेषोपनामको नृसिंहसूनुः श्रीकृष्णकविः कास्यामकबरबादशाहराज्यसमये खिस्ताब्दीयषोडशशातकस्योत्तरभाग आसीत्. एतन्नाटकं चानेनाकबरमन्त्रिणो राजाटोडरमल्लनाम्नः पुत्रस्य गोवर्धनधारीत्यपरनाम्नो गिरिधारिणः प्रेरणया प्रणीतम्. अनेनैव कविना काञ्चीपरिसरवर्तिताण्डवपुरनृपतेरनुजन्मनो नरोत्तमस्याभ्यर्थनया पारिजातहरणचम्पूरपि निरमायि. नाटकस्यास्य मुद्रणमस्माभिः पुस्तकद्वयाधारेणारब्धमस्ति. तत्र प्रथमं पुस्तकं प्रायःशुद्धमन्तिमपत्ररहितं शतवर्षप्राचीनमिवोपलक्ष्यमाणं जयपुरराजवैद्यश्रीकृष्णरामकवेः

काव्यमाला ।

महाकविश्रीशेषकृष्णप्रणीतं

कंसवधम् ।

प्रथमोऽङ्कः ।

प्रारम्भः शुभकर्मणस्त्रिभुवनक्लेशाभिचारागमः
कान्ताकर्षणकर्मकार्मणविधिः कामाद्वितीयश्रुतिः ।
हुंकारो मदनस्य निर्वृतिवधूमञ्जीरशिञ्जाध्वनिः
श्रेयः संपदमातनोतु भवतः कंसारिवंशीरवः ॥ १ ॥

अपि च ।

वृन्दारण्ये चरन्ती विभुरपि सततं भूर्भुवःस्वः सृजन्ती
नन्दोद्भूताप्यनादिः शिशुरपि निगमैर्लक्षिता वीक्षितापि ।
विद्युल्लेखावनद्धोन्नमदमलमहाम्भोदसच्छायकाया
माया पायादपायादविदितमहिमा कापि पैताम्बरी वः ॥२॥

---

१. अयं महाराष्ट्राभिजनः शेषोपनामको नृसिंहसूनुः श्रीकृष्णकविः काश्यामकबरबादशाहराज्यसमये खिस्ताब्दीयषोडशशतकस्योत्तरभाग आसीत्. एतन्नाटकं चानेनाकबरमन्त्रिणो राजाटोडरमल्लनाम्नः पुत्रस्य गोवर्धनधारीत्यपरनाम्नो गिरिधारिणः प्रेरणया प्रणीतम्. अनेनैव कविना काशीपरिसरवर्तिताण्डवपुरनृपतेरनुजन्मनो नरोत्तमस्याभ्यर्थनया पारिजातहरणचम्पूरपि निरमायि. नाटकस्यास्य मुद्रणमस्माभिः पुस्तकद्वयाधारेणारब्धमस्ति. तत्र प्रथमं पुस्तकं प्रायःशुद्धमन्तिमपत्ररहितं शतवर्षप्राचीनमिवोपलक्ष्यमाणं जयपुरराजवैद्यश्रीकृष्णरामकवेः सकाशादधिगतं क-चिह्नितम्. द्वितीयं चास्मदीयमेव नवीनं नातिशुद्धं च ख-चिह्नितमित्यवधेयम्.

अन्यच्च ।

मुञ्चामुं चण्डिमानं मयि भुजगफणारत्नसंक्रान्तकाय-
च्छायां प्रेक्ष्य स्वकीयामपि मनसि वृथा मा कृथा दुर्वितर्कम् ।
इत्युक्त्वा पादपद्मे सपदि निपततो मूर्ध्नि गङ्गाधरस्य
प्रेङ्खन्तश्चण्डिकायाः शतगुणितरुषः पान्तु वोऽपाङ्गभङ्गाः[1] ॥ ३ ॥

(नान्द्यन्ते ।)

सूत्रधारः—अलमतिविस्तरेण । अद्य खलु निखिल[2]वृन्दारकवृन्द-
वन्द्यमानपादारविन्दस्य तुहिनगिरिनन्दिनीनयनानन्दनिःस्यन्दकन्दस्य
सकलसुरासुरोरगनरकिंनरनिकरगीयमानत्रिपुरदहनावदानस्य त्रिभुवनभ-
वनारम्भस्तम्भस्य चतुर्वर्गलक्ष्मीप्रतीक्ष्यमाणकृपाकटाक्षाञ्चलस्य भगवतः
श्रीविश्वेश्वरस्य प्रासाद[3]परिसरसीम्नि महानेव कलकलः समुल्लसति ।
तदत्र यात्राप्रसङ्गसंगतैर्नानादिगन्तवास्तव्यैर्विविधानवद्य[4]हृद्यविद्याविनो-
दमोदमानमानसैः सकलकलाकलापकौशलनिकषैर्विदग्धमिश्रैरुपस्थानी-
यैर्भवितव्यम् । तद्यावदेतान्निजविज्ञानोपहारेणोपतिष्ठे । यतः ।

बुद्धिं वर्धयति श्रियं वितनुते वैदग्ध्यमामुञ्चति
श्रेयः पल्लवयत्यघानि दलयत्युन्मीलयत्युन्नतिम् ।
विज्ञानं परिशोधयत्युपचिनोत्युच्चैः कलाकौशलं
किं किं नारभते हरेरिव कथाजर्यं सतां सङ्गतम् ॥ ४ ॥

(परिक्रम्य पादान्तरे स्थित्वा । सविमर्षम् ।) कथमनाहूत एव रङ्गं प्रविश-
न्नवज्ञापराहतो नोपहसनीयः स्याम् । यतः ।

---

१. 'भङ्गाः' इति क-पुस्तकपाठः. २. 'निखिल' इति क-पुस्तके नास्ति.
३. 'परिसर' इति क-पुस्तके नास्ति. ४. 'हृद्य' इति क-पुस्तके नास्ति.

नागच्छन्नुपहूयते न वचनोत्थानासनैः पूज्यते
नो पृच्छन्ननुभाष्यते न च दृशा सान्द्रादरं वीक्ष्यते ।
ईर्ष्यारोषकषायिते हृदि घृणालेशोऽपि न स्पृश्यते
किं त्वेकः प्रवदन्समञ्जसमपि प्राज्ञः शठैर्हस्यते ॥ ५ ॥

(निमित्तं सूचयित्वा । सहर्षम् ।)

स्पन्दते दक्षिणं चक्षुर्वक्षो विस्फार्यते यथा ।
सामाजिकास्तथा मन्ये नृत्याय त्वरयन्ति माम् ॥ ६ ॥

(आकाशे कर्णं दत्त्वा ।) किं ब्रूथ—'दूराध्वसंचारपरिश्रान्तस्वान्तानस्मान्केनचिदभिनवग्रथितवस्तुना प्रयोगेण भगवत्कृपानुबन्धिना विनोदय' इति । तद्यावद्गृहं गत्वा गृहिणीमाहूय तथा करोमि । (नेपथ्याभिमुखमवलोक्य ।) अये, कथं

रात्रिजागरणायासकषायितविलोचना ।
अद्याप्येषा विशालाक्षी निद्रातन्द्रां न मुञ्चति ॥ ७ ॥

तथा हि ।

स्खलति शिथिलग्रन्थिर्गात्रादसौ (?) सिचयाञ्चलः
स्थगयति कुचौ वामः पाणिः परं धृतवासनः ।
गलति कबरी वक्त्रं लीलालकैः परिभूयते
तदपि नयनानन्दायैषा दशा हरिणीदृशः ॥ ८ ॥

(विमृश्य ।) सुखप्रसुप्तामप्येतां कालातिपातकातरः प्रबोधयामि तावत् । (प्रविश्य ।) आर्ये, कथमद्यापि निद्रासि । ननूदितभूयिष्ठ एव भगवान्किरणमाली । तथा हि ।

मीलत्कैरवलोचनां प्रविगलत्तारास्तहारावलीं

अन्यच्च ।

मुञ्चामुं चण्डिमानं मयि भुजगफणारत्नसंक्रान्तकाय-
च्छायां प्रेक्ष्य स्वकीयामपि मनसि वृथा मा कृथा दुर्वितर्कम् ।
इत्युक्त्वा पादपद्मे सपदि निपततो मूर्ध्नि गङ्गाधरस्य
प्रेङ्खन्तश्चण्डिकायाः शतगुणितरुषः पान्तु वोऽपाङ्गभङ्गाः[1] ॥ ३ ॥

(नान्द्यन्ते ।)

सूत्रधारः—अलमतिविस्तरेण । अद्य खलु निखिल[2]वृन्दारकवृन्द-
वन्द्यमानपादारविन्दस्य तुहिनगिरिनन्दिनीनयनानन्दनिःस्यन्दकन्दस्य
सकलसुरासुरोरगनरकिंनरनिकरगीयमानत्रिपुरदहनावदानस्य त्रिभुवनभ-
वनारम्भस्तम्भस्य चतुर्वर्गलक्ष्मीप्रतीक्ष्यमाणकृपाकटाक्षाञ्चलस्य भगवतः
श्रीविश्वेश्वरस्य प्रासाद[3]परिसरसीम्नि महानेव कलकलः समुल्लसति ।
तदत्र यात्राप्रसङ्गसंगतैर्नानादिगन्तवास्तव्यैर्विविधानवद्य[4]हृद्यविद्याविनो-
दमोदमानमानसैः सकलकलाकलापकौशलनिकषै[5]र्विदग्धमिश्रैरुपस्थानी-
यैर्भवितव्यम् । तद्यावदेतान्निजविज्ञानोपहारेणोपतिष्ठे । यतः ।

बुद्धिं वर्धयति श्रियं वितनुते वैदग्ध्यमामुञ्चति
श्रेयः पल्लवयत्यघानि दलयत्युन्मीलयत्युन्नतिम् ।
विज्ञानं परिशोधयत्युपचिनोत्युच्चैः कलाकौशलं
किं किं नारभते हरेरिव कथा[6]जर्यं सतां संगतम् ॥ ४ ॥

(परिक्रम्य पादान्तरे स्थित्वा । सविमर्षम् ।) कथमनाहूत एव रङ्गं प्रविश-
न्नवज्ञापराहतो नोपहसनीयः स्याम् । यतः ।

---

१. 'भङ्गाः' इति क-पुस्तकपाठः. २. 'निखिल' इति क-पुस्तके नास्ति. ३. 'परिसर' इति क-पुस्तके नास्ति. ४. 'हृद्य' इति क-पुस्तके नास्ति. ५. निकषः सुवर्णपरीक्षणपाषाणः. ६. न जीर्यतीत्यजर्यमिति संगतस्य विशेषणम्. ७. मैत्री.

नागच्छन्नुपहूयते न वचनोत्थानासनैः पूज्यते
नो पृच्छन्ननुभाष्यते न च दृशा सान्द्रादरं वीक्ष्यते ।
ईर्ष्यारोषकषायिते हृदि घृणालेशोऽपि न स्पृश्यते
किं त्वेकः प्रवदन्समञ्जसमपि प्राज्ञः शठैर्हस्यते ॥ ५ ॥

(निमित्तं सूचयित्वा । सहर्षम् ।)

स्पन्दते दक्षिणं चक्षुर्वक्षो विस्फार्यते यथा ।
सामाजिकास्तथा मन्ये नृत्याय त्वरयन्ति माम् ॥ ६ ॥

(आकाशे कर्णं दत्त्वा ।) किं ब्रूथ—'दूराध्वसंचारपरिश्रान्तस्वान्तानसान्केनचिदभिनवग्रथितवस्तुना प्रयोगेण भगवत्कृपानुबन्धिना विनोदय' इति । तद्यावद्गृहं गत्वा गृहिणीमाहूय तथा करोमि । (नेपथ्याभिमुखमवलोक्य ।) अये, कथं

रात्रिजागरणायासकषायितविलोचना ।
अद्याप्येषा विशालाक्षी निद्रातन्द्रां न मुञ्चति ॥ ७ ॥

तथा हि ।[1]

स्खलति शिथिलग्रन्थिर्गात्रादसौ (?) सिचयाञ्चलः
स्थगयति कुचौ वामः पाणिः परं धृतवासनः ।
गलति कबरी वक्त्रं लीलालकैः परिभूयते
तदपि नयनानन्दायैषा दशा हरिणीदृशः ॥ ८ ॥

(विमृश्य ।) सुखप्रसुप्तामप्येतां कालातिपातकातरः प्रबोधयामि तावत् । (प्रविश्य ।) आर्ये, कथमद्यापि निद्रासि । ननूदितभूयिष्ठ एव भगवान्किरणमाली । तथा हि ।

मीलत्कैरवलोचनां प्रविगलत्तारात्तहारावलीं
म्लायच्चन्द्रमुखीं विशृङ्खलतमःकेशां सशोषाम्बराम् ।

---

१. 'तथा हि' इति ख-पुस्तके नास्ति.

प्रातः सत्वरमित्वरीमिव[1] बलादुद्गाढरागैः करै-
राकर्षन्निव यामिनीमनुपतत्यम्भोजिनीवल्लभः ॥ ९ ॥
अपि चातिपतति[2] पुरंश्रीगृहाचारसमयः । नन्वेतामेव तावत्प्रभातवेलां पतिव्रताधर्ममनुवर्तमानां दिनकरकुलवधूं पश्यतु भवती । तथा हि ।

उद्बुध्य प्रथमं प्रसाध्य वदनं संमृज्य तारोत्करं
निर्माल्यावकरं ततोऽवतमसैरालिप्य सद्गोमयैः ।
सौरैः स्वस्तिकमण्डलानि किरणैरारभ्य निर्मात्यह-
र्लक्ष्मीः स्त्रीसमयागतं सरसिजैः पुष्पोपहारं भुवः ॥१०॥

नटी—(सहसोपसृत्य[3]।) *एस म्हि । आणवेदु अज्जो किंणिमित्तं महच्चे अ पच्चूसे सद्दाविद म्हि ।

सूत्रधारः—आर्ये, त्वरयन्त्येते नानादिगन्तागताः सकलकलाज-लघिसांयात्रिका यात्रिकाः संगीतरङ्गप्रसङ्गाय माम् । तत्प्रसाध्यन्तां पात्राणि प्रवेशोचितवर्णिकापरिग्रहेण ।

नटी—[4]को उण एदाणं सामाजिआणं मँज्झे णिग्गहाणुग्गहस-मत्थो अँज्झक्खो जस्स पुरदो णच्चामो ।

सूत्रधारः—[5]आर्ये, अयमेव तावदखिलब्रह्माण्डमण्डपमहानटः सृष्टिस्थितिप्रलयनाटिकासूत्रधारः सूत्रात्मा विश्वसाक्षी भगवानिन्दु-

---

*एषास्मि । आज्ञापयत्वार्यः किंनिमित्तं महत्येव प्रत्यूषे शब्दायितास्मि ।

[4]कः पुनरेतेषां सामाजिकानां मध्ये निग्रहानुग्रहसमर्थोऽध्यक्षो यस्य पुरतो नृत्यामः ।

---

१. कुलटामिव. २. 'निपतति' इति क-पाठः. ३. 'सोपसृत्य' इति ख-पाठः. ४. 'मज्झे' इति क-पुस्तके नास्ति. ५. 'अज्झक्खो' इत्यस्य स्थाने ख-पुस्तके 'अज्जउत्तो' इत्यस्ति. ६. 'अये' इति ख-पाठः.

शेखरः । तत्पादपद्मपरिचर्यापर्याप्तप्राप्तसाम्राज्यधुरंधरो गोवर्धनधारि-राजश्च ।

नटी—*को उण एसो गोवद्धनधारीति भणिज्जइ ।

सूत्रधारः—तदाकर्ण्यतां यदि कौतुकम् ।

अस्ति क्ष्मापालमौलिज्वलदमलमणिश्रेणिनिःश्रेणिरोह-
द्रोचिर्वीचिप्रपञ्चच्छुरितपदनखप्रेङ्खदुद्यन्मयूखैः ।
येनाकालेऽपि बालारुणकरनिकरो जागरोज्जृम्भमाण-
ज्योत्स्नाजालैर्जटालं स्फुटमजनि हरिच्चक्रवालान्तरालम् ॥ ११ ॥

अपि च ।

वापी पातालमूलं जलमुरगनदी कच्छपः स्वच्छकन्दः
शेषो नालं दलानां विततिरपि फणाः कर्णिका शैवशैलः ।
तारास्तारा परागा मधु च मधुमती केसरा दन्तिदन्ता-
स्तस्मिन्यत्कीर्तिपद्मे भ्रमति मधुकरः शर्वरीसार्वभौमः ॥ १२ ॥

तस्यास्ति तण्डनकुलामलमण्डनस्य
श्रीतोडरक्षितिपतेस्तनयो नयज्ञः ।
नानाकलाकुलगृहं स विदग्धगोष्ठी-
मेकोऽधितिष्ठति गुरुर्गीरिधारिनामा ॥ १३ ॥

तेन चाहं सबहुमानमाहूय ससमाजेनादिष्टोऽस्मि ।

नटी—†जइ एवं ता कीस चिन्तापज्जाउलहिअओ विअ चिर-अन्तो चिट्ठसि ।

---

*कः पुनरेष गोवर्धनधारीति भण्यते ।

†यद्येवं तत्कस्माच्चिन्तापर्याकुलहृदय इव चिरयंस्तिष्ठसि ।

---

१. 'पर्याप्तप्राज्यसाम्राज्य–' इति क-पाठः.

सूत्रधारः—प्रिये, महदेव चिन्तास्थानं सभ्योपस्थानम्। तथा हि।

नाहूतापि पुरः पदं रचयति प्राप्तोपकण्ठं हठा-
त्पृष्टा न प्रतिवक्ति कम्पमयते स्तम्भं समालम्बते ।
वैवर्ण्यं स्वरभङ्गमञ्चति बलान्मन्दाक्षमन्दानना
कष्टं भोः प्रतिभावतोऽप्यभिसभं वाणी नवोढायते ॥ १४ ॥

नटी—*अज्ज, जइ एव्वं ता किं ति अप्पा संकडे पाडिज्जइ ।

सूत्रधारः—आर्ये,

त्वरयति नृपगोष्ठीसंस्तवस्त्र्यातिलिप्सा
जडयति च विदग्धाराधनासाहसिक्यम् ।
इति न समधिकर्तुं रूपकं नो विरन्तुं
प्रभवति बत दोलारोहदुःस्थं मनो मे ॥ १५ ॥

नटी—†को उण उज्जाओ विअड्ढाराहणस्स ।

सूत्रधारः—प्रिये, ममाप्येष विमर्शश्चिरं चेतसि वर्तते । यतः ।

प्राचीं वाचामुदारां नवरसलहरीहारिबन्धान्प्रबन्धा-
नापीय श्रोत्रपात्रैरपहृतहृदया हन्त तर्षप्रकर्षात् ।
गुम्फैः संफुल्लमल्लीसरससुमनसां माधुरीमुद्विरन्तः
सन्तः संतोषमन्तः कमपि सहृदयास्वाद्यमेते वहन्ति ॥ १६ ॥

अपि च ।

सारस्वते स्रोतसि दूरमग्नैः सुधीवरैरुद्धृतसूक्तिरत्नैः ।
न तत्किमप्युर्वीरितं यदेषामुपायनीकृत्य पुरो भवेयम् ॥ १७ ॥

---

*आर्य, यद्येवं तत्किमित्यात्मा संकटे पात्यते ।

†कः पुनरुपायो विदग्धाराधनस्य ।

अन्यच्च ।

निर्मज्याशु सुधीवरैः प्रतिपदं सारस्वतोदन्वतः
प्रोद्धत्यापहृतैर्दिगन्तसुलभैः सत्सूक्तिमुक्ताफलैः ।
सद्वर्णैः परिपूर्णकर्णहृदया भूमीभुजोऽमी ततः
किं मे ताननुरञ्जयिष्यति वचोवाचालकाचावली ॥ १८ ॥

(स्मृतिमभिनीय । सहर्षम् ।) आर्ये, दिष्ट्या समासादितः खलु दुरन्तचिन्ताकान्तारसंतारहेतुः । तथा हि ।

पृथ्वीमण्डलमौलिमण्डनमणिः श्रीमन्नृसिंहात्मजः
कृत्वा कृष्णकविः कुतूहलवशादस्मासु यन्न्यक्षिपत् ।
नाट्यं कंसवधाभिधानमधुना तस्य प्रयोगोद्यमं
विद्वद्राजसमाजमानसमहानन्दाय विन्दामहे ॥ १९ ॥

नटी—(अपवार्य ।) *कहं सो वि कवीणं मज्झे संभाविज्जइ ।

सूत्रधारः—अयि मुग्धे, किमेवमाशङ्कसे । यतः—

चतुर्दशसु विद्यासु परिकर्मितचेतसः ।
कवितेति कियन्नाम तस्याश्चर्यं विपश्चितः ॥ २० ॥

नटी—†णं भणामि पसाअकविणो विअ तस्स वि पण्डिअकइणो वाणी विअड्ढजणस्स पज्जुत्ता भोदि त्ति ।

सूत्रधारः—बाढम् । यतः—

---

*कथं सोऽपि कवीनां मध्ये संभाव्यते ।

†ननु भणामि प्रसादकवेरिव तस्यापि पण्डितकवेर्वाणी विदग्धजनस्य पर्युक्ता भवति ।

---

१. 'मुक्ताभरैः'.इति क-पाठः.

मौलौ मन्दारदामभ्रमदलिपटलीकाकलीं श्रोणिबिम्बे
कूजत्काञ्चीकलापं चरणकमलयोर्मञ्जुमञ्जीरशिञ्जाम् ।
उत्सङ्गे कीरगीतं स्तनभुवि मसृणं वल्लकीपञ्चमं वा
तत्काव्ये दत्तकर्णा शिवशिव मनुते भारती भारमेव ॥ २१ ॥

अपि च ।

यः पीयूषमयूखधामनि सुधासाराच्छकच्छेऽपि यः
क्षुभ्यत्क्षीरसमुद्रसान्द्रलहरीलावण्यपूरेऽपि यः ।
यः कान्ताधरपल्लवे मधुरिमा नासौ समुद्गाहते
श्रीविद्वत्कविकृष्णपण्डितवचोवीचीसमीचीनताम् ॥ २२ ॥

नटी—*अज्जउत्त, णं सुणीअदि सद्दाणुसासणे दिढं कदब्भासो एसो त्ति ।

सूत्रधारः—आर्ये, भूषणमेतन्न दूषणं कवीनां व्याकरणकोविदतेति । तथा हि ।

[1]रसालंकारसारापि वाणी व्याकरणोज्झिता ।
[2]श्वित्रोपहतगात्रेव न रञ्जयति सज्जनान् ॥ २३ ॥

नटी—(सोद्वेगम् ।) †अण्णं भणामि । विसविसमविसहरवइजीहासहस्सणीसरिअवक्ककक्कसविअडवअणोवण्णासणिच्चाहिओअफंसदूसिआ तस्स जीहा कहं महुरमहुररसलालसाइं [3]रसिअजणमणाइं रञ्जइस्सदित्ति णत्थि मे हिअअस्स आसङ्को ।

---

*आर्यपुत्र, ननु श्रूयते शब्दानुशासने दृढं कृताभ्यास एष इति ।

†अन्यद्भणामि । विषविषमविषधरपतिजिह्वासहस्रनिःसृतवक्रकर्कशविकटवचनोपन्यासनित्यप्रयोगस्पर्शदूषिता तस्य जिह्वा कथं मधुरमधुररसलालसानि रसिकजनमनांसि रञ्जयिष्यतीति नास्ति मे हृदयस्यासङ्गः ।

---

१. 'रसालंकारसंगत्या' इति क-पाठः. २. 'श्वित्रोपहतगात्रेव' इति ख-पाठः. ३. 'रसालसाइं' इति ख-पाठः. 'रसालसानि' इति तच्छाया.

सूत्रधारः—(विहस्य ।) अयि मुग्धे न खलु निसर्गमधुरोदारप्रकृतयो वाचः सांसर्गिकैर्दोषैरुपहन्यमाना अपि स्वाभाविकं[1] गुणमतिवर्तन्ते । पश्य तावत् ।

घ्माता भालतलानलैः कवलिता कण्ठोत्थहालाहलै-
रालीढाथ जटाटवीवलयितैराशीविषाणां गणैः ।
कीर्णा भस्मभिराहतास्थिपटलैर्विद्धा जटाभैरपि
स्वीयामुज्झति माधुरीं हरशिरोरत्नं किमिन्दोः कला ॥ २४ ॥

नटी—(सोत्त्रासम् ।) *अज्ज, एवं णेदम् । णं भणामि तह वि दुज्जणा अवज्जाणिज्जा जह अणुमेत्ते वि अम्हाणं कुसीलवाणं खलिदे ण पडिहसन्ति ।

सूत्रधारः—आर्ये, अलमनया चिन्तया । निसर्गः खलु स तादृशां[2] नोपायसहस्रैरपि विपरिणमयितुं[3] शक्यः । यतः—

अमृतं किरति हिमांशुर्विषमेव फणी समुद्गिरति ।
गुणमेव वक्ति साधुर्दोषमसाधुः प्रकाशयति ॥ २५ ॥

तदलं कालातिपातेन । प्रस्तूयतां प्रावेशिकं संगीतकम् ।

नटी—†कं उण समअं समस्सिअ गाइस्सम् ।

सूत्रधारः—नन्विममेवाचिरप्रवृत्तं सर्वसुखाकरं प्रावृट्समयमाश्रित्य गीयताम् । इह हि ।

---

*आर्य, एवमेतत् । ननु भणामि तथापि दुर्जना आवर्जनीया यथाणुमात्रेऽप्यस्माकं कुशीलवानां स्खलिते न प्रतिहसन्ति ।

†कं पुनः समयं समाश्रित्य गास्ये ।

---

१. 'स्वाभाविकगुणान्नातिवर्तन्ते' इति ख-पाठः. २. 'तादृशः' इति ख-पाठः. ३. 'विनिमयितुं' इति ख-पाठः.

मृदितमृदुमृदङ्गध्वानधिक्कारिमेघ-
ध्वनिमुदितमयूरीमन्द्रकेकोपगीताः ।
सजलजलदजालानीलनेपथ्यलक्ष्य-
क्षणरुचिरुचिराङ्क्यः स्वैरमाशा नटन्ति ॥ २६ ॥

नटी—*तह । (इति गायति ।)

पणमह जलहरसमअं विज्जुज्जलसोम्मसामसुहअसिरिम् ।
जं दट्ठूण दिसाणं कदम्बमउलेहिँ होन्ति पुलआइं ॥ २७ ॥

सूत्रधारः—(सहर्षम् ।) आर्ये, सम्यगुपलक्षितं भवत्या । सकलमङ्गलालयः किलायं समयः । तथा हि ।

वसुदेवदुःखहारी नारीनयनोत्सवो जलदकालः ।
शौरिरिव सीरिमित्रं कंसंमदविच्युतं कुरुते ॥ २८ ॥

(नेपथ्ये ।)

आः पाप, कोऽयमलीकवैतालिकः सकलसुरासुरचक्रचूडामणिमयूखमांसलप्रतापाग्निनिर्दग्धवैरिजातस्य त्रिभुवनजयलक्ष्मीविभ्रमावासमण्डपस्तम्भायमानप्रचण्डभुजदण्डस्य सकलवीरवंशावतंसस्य कंसस्यापि मदप्रच्यवमभिलषन्वाचाटतां प्रकटयति ।

---

*तथा ।

प्रणमत जलधरसमयं विद्युदुज्ज्वलसौम्यश्यामसुभगश्रियम् ।
यं दृष्ट्वा दिशां कदम्बमुकुलैर्भवन्ति पुलकानि ॥

---

१. 'जलदलीलनील' इति ख-पाठः. २. 'क्षणरुचिरुचिरम्याः' इति ख-पाठः. ३. 'जस्सिं दहदिसाणं' इति क-पाठः. 'यस्मिन्दशादिशां' इति तच्छाया. ४. 'सर्वे' इति ख-पाठः. ५. वसुदेवः श्रीकृष्णजनकः. जलदकालपक्षे त्वस्फुटोऽर्थः. ६. सीरी बलदेवः; (पक्षे) सीरिणो हालिकाः कर्षका इति यावत्. ७. कंसः कृष्णमातुलः. तं मदविच्युतं निर्मलं कुरुते; (पक्षे) कं जनं संमदेन हर्षेण विच्युतं रहितं कुरुते. अपि तु न कमपि.

नटी—(सोत्कम्पम् ।) *अज्ज, को एसो जस्स आआलिअप्पलअवादविहडन्तबम्हण्डखण्डपप्फुरन्तघोरणिग्घोसबोलन्तदहदिहामुहो एक्ककालगज्जन्तदिग्गअविमुक्कविक्कारकक्कसो कण्ठधुणी सुणीअदि ।

सूत्रधारः—अये, ममाप्ययमपरिचितः । (निपुणं निरूप्य ।) नूनमसौ

असद्वचःप्रतिफलन्निजनामधेय-
वर्णावलीश्रवणरोषकषायिताक्षः ।
आभङ्गुरभ्रुकुटिभीषणभालपट्टः
कंसः करालकरवालनिविष्टमुष्टिः ॥ २९ ॥

न तदस्य पुरतः स्थातुमस्माकमुचितम् । यतः ।

पितरं भगिनीं भामं[2] भागिनेयाञ्छिघांसता ।
तृणीकृता घृणा येन स किमस्मानुपेक्षते ॥ ३० ॥

तदेहि । अन्यतो गच्छावः ।

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

(ततः प्रविशति यथानिर्दिष्टः कंसः ।)

कंसः—(साटोपं परिक्रम्य । सक्रोधम् ।) किमात्थ रे, किमात्थ 'कंसं मदविच्युतं कुरुते' इति । ननु रे, नाद्यापि विदितस्ते त्रिभुवनैकवीरो निर्मिताशेषदुर्मदध्वान्तध्वंसः कंसः ।

यद्दोर्दीप्यत्प्रतापानलबहलवलज्ज्वालजालावलीढः
शिश्ये शौरिः पयोधौ तुहिनगिरिदरीष्वन्धकारि[3]निलिल्ये ।

---

*आर्य, क एष यस्याकालिकप्रलयवातविघटमानब्रह्माण्डखण्डप्रस्फुरद्घोरनिर्घोषशब्दायमानदशदिङ्मुख एककालगर्जद्दिग्गजविमुक्तचीत्कारकर्कशः कण्ठध्वनिः श्रूयते ।

---

१. 'हस्ते' इति ख-पाठः. २. भामं भगिनीपतिम्. ३. अन्धकारिः शिवः.

ब्रह्मा पद्मासनः सन्गमयति समयं तापसच्छद्मना त-
द्रक्षोयक्षोरगाणामिह बत कतमो वीक्षितं मे क्षमेत ॥ ३१ ॥

(हस्तौ निष्पीड्य ।) ननु रे,

कारागारनियन्त्रितासुरसुरस्त्रीनेत्रकादम्बिनी-
निर्यद्वारिसरिज्झरव्यतिकरैर्निर्वाप्यमाणोऽपि यः ।
उच्चैरौर्व इव प्रजिज्वलयिषुर्ब्रह्माण्डमुज्जृम्भते
कस्तं वा मम दोर्मदं दमयितुं जागर्ति लोकत्रये ॥ ३२ ॥

(नेपथ्ये ।)

आः, कथमित्थं विकत्थसे । ननु रे,

यस्ते मदं दमयिता दनुजेन्द्रकालो
बालः स कोऽपि भगवान्क्वचिदप्रमेयः ।
संवर्धते गिरिगभीरगुहाविहार-
तन्द्रालुकेसरिकिशोर इवाविभाव्यः ॥ ३३ ॥

कंसः—(सातङ्कम् ।) कथमियमाकाशे दुरुपश्रुतिः श्रूयते । न चाशरीरा दैवी वागर्थेन विसंवदते कथंचित् । संभावितश्चायमर्थः । निसर्गविद्वेषिणो हि देवा बहुधासाभिः कदर्थिता वैरप्रतियातनाय स्वयमशक्ता अपि बहुधावतीर्णमेव पुराणपुरुषं पुनरवतारयिष्यन्तीति । कथितश्चायमर्थः । पूर्वमप्यन्तरिक्षचारिण्या वाण्या वसुदेवेन निवृत्त-पाणिग्रहणां स्वसारं देवकीं प्रस्थापयतो मम । यथा—'अस्यास्त्वाम-ष्टमो गर्भो हन्ता यं वहसेऽबुध' इति । तदाकर्ण्य च ततः प्रतीपमा-शङ्कमानेन मया देवकीवसुदेवौ दृढनिगडयन्त्रितौ कारागरमा-रोपितौ । तद्गर्भाश्चोत्पतन्त एव बहवो व्यापादिता एव । संप्रति

---

१. 'बहुधावतीर्णं तमेव' इति क-पाठः.

तु शिलातले निपात्यमानया दारिकया योगमायया हस्तादुत्प्लुत्य गगनतलमुत्पतितया प्रागुक्तमेव । नारदेनापि पुनरुक्तं यत्किल 'वसुंधराभारावताराय गृहीतवर्णिकान्तरः कपटपटुर्बटुनाटितकेन वैकुण्ठनाथः सपरिजनो गोकुले प्रच्छन्नरूपः संचरति' इति । तदस्यानर्थबीजस्य प्रतिक्षेपे नोपेक्षितुं युक्तम् । भवतु तावत् । (प्रकाशम् । नेपथ्याभिमुखम् ।) कः कोऽत्र भोः ।

(प्रविश्य ।)

दौवारिकः—*जयदु जयदु महाराओ । एसम्हि ।

कंसः—हेमाङ्गद, समाह्वयतां महामात्यः ।

हेमाङ्गदः—†जं देवो आणवेदि । (इति निष्क्रम्य तेन सह प्रविश्य ।) इदो इदो महामच्चो । एसो महाराओ तुमं चिरं पडिक्खन्तो चिट्ठदि । ता उपसप्प णम् । (संकृतमाश्रित्य ।)

हेलोत्खातदिगन्तदन्तिदशनैः संस्त्यानदानद्रव-
द्रोणीश्यामलकान्तिभिर्विरचितं सिंहासनं मण्डयन् ।
रज्यल्लोचनकोणशोणकिरणं चन्द्रातपत्रं दध-
त्स्वर्बन्दीकरचामरैः परिचितो देवोऽयमास्ते पुरः ॥ ३४ ॥

महामात्यः—(पुरोऽवलोक्य । राजानं निर्वर्ण्य ।) कथमयं रसान्तरावेशविलक्ष इवालक्ष्यते । तथा हि ।

निःश्वासैः परुषैर्विशुष्यदसकृद्व्यादश्यमानाधरं
स्विद्यद्भालकपोलरागमधिकं नेत्रेऽरुणिम्नार्जयन् ।

---

*जयतु जयतु महाराजः । एषोऽस्मि ।

†यद्देव आज्ञापयति । इत इतो महामात्यः । एष महाराजस्त्वां चिरं प्रतीक्षमाणस्तिष्ठति । तदुपसर्पैनम् ।

---

१. 'कपटपटुपटु–' इति ख-पाठः. २. 'नेत्रारुणिम्ना' इति क-पाठः.

वक्रं किंचिदिवाञ्चयन्नुपरतव्यापारमन्तश्चिरं
चिन्ताकुञ्चितलोचनाञ्चलमहो देवः परिध्यायति ॥ ३५ ॥

तदत्र महता केनचिद्भयरोषद्वैराज्यावेशबीजेन भवितव्यम् । भवतु परिज्ञास्यामि तावत् । (उपसृत्य ।) जयतु जयतु महाराजः ।

कंसः—महामात्य, इत आस्यताम् ।

महामात्यः—(उपविश्य ।) देव, दिष्ट्या वर्धसे ।

स्वैरास्वादितशत्रुशोणितमधुव्याघूर्णमानाक्षया
बन्दीभूतसुरेन्द्रवृन्दवनितावाष्पाम्बुभिः स्नातया ।
स्फूर्जत्त्रावककान्तकीर्तिवसनप्रान्तेन संवीतया
निर्व्याजं परिरभ्यते तव भुजस्त्रैलोक्यराज्यश्रिया ॥ ३६ ॥

तत्किमपि चिन्तानिमित्तं ज्ञातुमिच्छामि ।

कंसः—किमिह चिन्तास्थानम् । यतः ।

निष्कण्टकं विगतवैरमपास्तशङ्कं
दासीकृतामरगणं हृतदिक्करीन्द्रम् ।
त्रैलोक्यमेव विहितं दनुजैश्चिरं त-
च्चिन्तानिमित्तमिह नस्तु किमस्तु वस्तु ॥ ३७ ॥

तथापि दुरुपश्रुतिश्रवणसंभवशङ्कापिशाचिका किमप्युत्तरलयति मे चेतः । तथा हि ।

रिपुरिति दुरुपश्रुतिः श्रुतिं मे व्यथयति यद्ययथातथं तथापि ।
जलधररसितं प्रकोपहेतुर्भवति हि बृंहितशङ्कया मृगारेः ॥ ३८ ॥

महामात्यः—महाराज, कासौ दुरुपश्रुतिः ।

---

१. 'इवाञ्चयन्' इति ख-पाठः. २. 'द्वैराज्यदोष–' इति ख-पाठः. ३. 'श्रवणवशङ्कापिशाची' इति क-पाठः.

(कंसः 'यस्ते मदं दमयिता' इत्यादि पठति ।)

महामात्यः—(स्वगतम् ।)

नैषा मृषा भवितुमर्हति देववाणी
नाणीयसीमपि नृपोऽर्हति हन्त चिन्ताम् ।
किं संप्रति प्रतिविधेयमिह प्रतीपे
दैवे प्रयुक्तमखिलं स्खलितां[1] प्रयाति ॥ ३९ ॥

भवतु तावत् । (प्रकाशम् ।) महाराज, अलमनया चिन्तया । यतः ।

दर्पोद्धुरेषु चतुरङ्गबलाधिकेषु
भ्रूभङ्गमात्रपरिनिर्जितनिर्जरेषु ।
त्वत्पादमूलपरिवर्तिषु माद्दशेषु
नामापि शत्रुरिति हन्त कुतः[2] प्रसिद्धम् ॥ ४० ॥

या चेयं दुरुपश्रुतिरित्युदाहृता देवेन तन्न किंचिदेतत् । यतः ।

पदे पदे प्रस्खलता मोहोपहतचेतसाम् ।
सुरोपजीविनामित्थं[3] प्रलापा नहि दुर्लभाः ॥ ४१ ॥

अन्यच्च विज्ञापयामि—भूतार्थमेतदुदाहृतं देवस्य । नीतिशास्त्रं पुनरन्यादृशम् । तथा हि ।

नावज्ञेयो रिपुरिति लघुः क्षीणसत्त्वोऽपि विज्ञै-
र्हन्तारण्यं दहति शनकैः संचिताङ्गः स्फुलिङ्गः ।
किं च न्यञ्चन्निभृतनिभृताकुञ्चिताङ्गो बिडालः
कालापेक्षी प्रसति सहसालक्षितोत्फालमाखुम् ॥ ४२ ॥

न च संप्रत्यव्यञ्जितविक्रिया इति विस्मृतवैराः संभावयितुमर्हाः । नीतिर्हि तादृशी भविष्णूनाम् । यदुदाहरन्ति—

---

१. व्यर्थत्वमित्यर्थः. २. 'न नः' इति क-पाठः. ३. सुराया मद्यस्य; (पक्षे) सुराणां देवानाम्.

'कौर्मं संकोचमास्थाय प्रहारमपि मर्षयेत् ।
प्राप्ते तु काले नीतिज्ञ उत्तिष्ठेत्कालसर्पवत्' ॥ ४३ ॥ इति ।
विशेषतश्च न बहुशोऽपक्रियमाणा विश्वसनीयाः । अविश्रमो हि वैरनिर्यातनाधिकारः । तथा हि ।

उदितमुदितं हन्ति ध्वान्तं सहस्रकरः करै-
र्निहतनिहतं भूयो भूयस्तमः परिजृम्भते ।
विरमति तमो नेदं नायं निषीदति भानुमा-
न्न खलु विकसद्वैरा धीराः कथंचिदुदासते ॥ ४४ ॥

तदत्रावश्यमकुतोभयेनापि [२]संनिहितात्याहितेनेव देवेनावहितेन भवितव्यम् । यतः ।

क्रूराः केसरिणस्तुषारशिखरिद्रोणीषु संशेरते
नागेन्द्रा अपि संचरन्ति विकटे विन्ध्याटवीकोटरे ।
धत्तेऽसौ भुजगेश्वरोऽपि धरणिं पातालमूले वस-
न्न्यायः पौरुषभूषणा नयविदो जातु प्रमाद्यन्ति न ॥ ४५ ॥

कंसः—एवमेतत् । किं तु चिन्तयामि, कथममी प्रच्छन्नकौलिकाः कपटपटवः सर्व एकपद एव सुनिग्रहा इति ।

महामात्यः—(चिरं विचिन्त्य ।) महाराज,

यज्ञायत्तं जीवितं देवतानां यज्ञाः साङ्गा ब्राह्मणेष्वायतन्ते ।
ते चाप्येते धर्मकर्मैकमूला मूले छिन्नेऽस्तैव वार्तामराणाम् ॥ ४६ ॥
एषु च निगृहीतेषु सर्वनिदानमेकादशात्मा विष्णुरपि सुनिग्रहः ।
यत्स्मरन्ति—

---

१. 'कृष्णसर्पवत्' इति पञ्चतन्त्रादिधृतः पाठः. २. 'संनिहितमृत्याहितेनैव' इति ख-पाठः.

'विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः ।
श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनुः' ॥ ४७ ॥ इति ।

कंसः—ममाप्येष परामर्शः । (नेपथ्याभिमुखमवलोक्य ।) कः कोऽत्र भोः ।

वेत्रहस्तः पुरुषः—*जयदु जयदु भट्टा । एसोम्हि । आणवेदु भट्टा ।

कंसः—वेत्रधर, समादिश निदेशवर्तिनः—

हन्यन्तां द्विजदेवसेवनपराः सर्वेऽपि वर्णाश्रमा
ध्वंस्यन्तां दमदानसत्यनियमस्वाध्याययज्ञादयः ।
पीड्यन्तां च तपोवनानि परितस्तीर्थानि पुण्याश्रमा
बध्यन्तामचिरात्सुरा हरिहरब्रह्मादयः सानुगाः ॥ ४८ ॥

वेत्रहस्तः—†जं भट्टा आणवेदि । (इति निष्क्रान्तः ।)

कंसः—महामात्य, त्वमपि स्वं नियोगमशून्यं कुरु । वयमप्यन्तरकरणीयाय [2]प्रयतामहे ।

(इति निष्क्रान्ताः सर्वे ।)

इति प्रथमोऽङ्कः ।

द्वितीयोऽङ्कः ।

(ततः प्रविशति तालजङ्घः ।)

तालजङ्घः—आदिष्टोऽस्मि तत्रभवता महामात्येन यत्किल 'अस्मद्वर्गनिसर्गवैरिणः पुराणपुरुषस्य नराकारधारिणः [3]क्वापि प्रच्छन्नः प्रभवः

---

*जयतु जयतु भर्ता । एषोऽस्मि । आज्ञापयतु भर्ता ।

†यद्भर्ताज्ञापयति ।

---

१. 'उपजीविनः' इति ख-पाठः. २. 'सज्जीभवामः' इति ख-पाठः. ३. 'क्वचित्' इति ख-पाठः.

श्रूयते । तत्प्रवृत्तिमुपाहर' इति । तत्किमत्र प्रतिपद्ये । यतः—

अन्विष्टा गिरिकंदरोदरसरित्कान्तारपुण्याश्रमाः
स्वःपातालमहीतलेषु परितश्चारैश्चरद्भिश्चिरम् ।
नाभूत्कर्णपथातिथिर्दितिकुलारातिप्रथा सर्वथा
तत्किं वाद्य निवेदयाम्यविदितादिष्टार्थसारः प्रभुम् ॥ १ ॥

(चिरं विचिन्त्य । दीर्घं निःश्वस्य ।) हन्त भोः,

अघटनघटनपटीयानेकः किल केवलं कालः ।
संभाव्यतेऽद्य डिम्भाज्जृम्भारिजितोऽपि यत्प्रभोर्भीतिः ॥ २ ॥

(स्मृतिमभिनीय सहर्षम् ।) अये, अस्ति किलैषा किंवदन्ती । यत्—

'यशोदया लाल्यमानो नन्दगोपस्य गोकुले ।
विडम्बयन्बालकेलीलां वासुदेवोऽभिवर्धते' ॥ ३ ॥ इति ।

तं चातिमानुषगुणाकृतिपौरुषाद्यै-
रुद्यं पुमांसमनुमाय निहन्तुमेनम् ।
प्राक्प्रेषिताः शकटधेनुकपूतनाद्या
नाद्यापि हन्त विनिवर्तितुमुत्सहन्ते ॥ ४ ॥

भवतु । तावद्गोकुलपरिसरमेवानुसरामि । (इति परिक्रम्य पुरोऽवलोक्य ।) अये, कथमयं गोकुलनिवासी गोपानां सौवस्तिको[1] ब्राह्मण इत एवाभिवर्तते । तदसादेव निःशेषां प्रवृत्तिमुपालप्स्ये । (उपसृत्य ।) गर्ग, प्रणम्यसे ।

गर्गः—कुशली भव ।

तालजङ्घः—कियद्दूरं प्रस्थितोऽसि ।

गर्गः—नन्दादेशाद्गोकुलोत्पातानुपशमयितुं ध्रुवतीर्थं गच्छामि ।

तालजङ्घः—अथ किं गोकुले ।

---

१. स्वस्तिकृत्. पुरोहित इति यावत्.

गर्गः—महत्येव दुरवस्था हा कष्टं कष्टं समाधीयते । तथा हि ।
वेतालग्रहपूतनाप्रभृतयो बालग्रहाः शान्तिकै-
र्नीता बल्युपहारमन्त्रमणिभिः शान्तिं कथंचिन्मया ।
उत्पाताः शकटासुरप्रभृतिभिर्दैत्यैः कृतास्ते पुन-
र्बालेनाद्भुतकर्मणा स्वयमहो कृष्णेन नीताः क्षयम् ॥ ५ ॥

तालजङ्घः—(स्वगतम् ।) तदेतत्प्रस्तूयते यदर्थोऽयमस्माकमायासः । (प्रकाशम् ।) स्पष्टं तावत्प्रपञ्चतां कः केन हत इति ।

गर्गः—
पूर्वं कौचिदुपस्थितौ तरुवरव्याजेन नन्दाङ्गणे
बुद्ध्वाकस्मिकमेष रिङ्गणपरो बालो विशालोर्जितः[2] ।
मात्रा मध्यनिबद्धदामकलितान्तोलूखलाकर्षणा-
दारुण्णौ[3] यमलार्जुनौ समहरद्दीर्घार्तघोरस्वरौ ॥ ६ ॥

तालजङ्घः—(स्वगतम् ।) तावेतौ नारदशापवशादवाप्ततरुभावौ नलकूबरमणिग्रीवौ भगवत्संनिधानैकोपनेयशापान्तौ कुबेरतनयौ । (पुनः सातङ्कम् ।) तन्नूनमयमेव भगवतोऽवतारो बाललीलामनुभवन्भविष्यति । भवतु । ज्ञास्यामि तावत् । (प्रकाशम् ।) अथापरमावेदय ।

गर्गः—
कंसादेशवशात्प्रविश्य शिबिरं नन्दाङ्गणेऽवस्थितं
पापिष्ठं शकटं विभाव्य कपटं बालोऽथ कालोपमः ।
तत्सौवस्तिकविप्रवाचनविधिव्यग्रीभवच्चिन्तया
मात्रा किंचन वञ्चितः क्षितितले क्षुत्क्षामदेहो लुठन् ॥ ७ ॥

तालजङ्घः—(साकूतम् ।) ततस्ततः ।

---

१. 'कष्टं कष्टं समास्थीयते' इति ख-पाठः. २. 'विशालोर्जितौ' इति ख-पाठः. ३. 'आभुग्नौ' इति ख-पाठः.

गर्गः—

क्षीरस्यार्तिभरोत्क्षिप्तचरणाङ्गुष्ठनोदितम् ।
पर्यास्थच्छकटं कूटं जर्जराङ्गास्थिपञ्जरम् ॥ ८ ॥

तालजङ्घः—अहह, असमञ्जसमसमञ्जसम् । अथान्येषां को वृत्तान्तः ।

गर्गः—

वात्यावर्तविवर्तनव्यतिकरादादाय बालं बला-
दन्वीक्षत्य जनं जवादुदपतद्दूरं तृणावर्तकः ।

तालजङ्घः—(साश्वासम्[1]) ततस्ततः ।

गर्गः—

तं च क्ष्माधरभारभूरिगरिमा व्यालम्ब्य कण्ठे हठा-
दायच्छन्समपोथयत्पृथुशिलापट्टे निपात्यार्भकः ॥ ९ ॥

तालजङ्घः—अहो दुरवस्थेदानीं जेयास्था[2] ।
यस्मिन्धावत्यमरनगरीलुण्ठनोत्सर्पिदर्प-
स्फूर्जज्जङ्घाजवपरिणमच्चण्डवात्याविवर्तैः ।
उच्चैर्भ्राम्यन्नभसि निदधे शृङ्गमुत्पाट्य मेरोः
क्रन्दत्संक्रन्दनमधुकरं लूननालं यथाब्जम् ॥ १० ॥
तस्यापि ते मनुष्यगर्भादपीदृशी दशा ।

गर्गः—

रिष्टोऽपि दुष्टदिष्टाकृष्टः कण्ठावगुण्ठने तिष्ठन् ।
दृष्टोऽच्युतेन दशनैर्दष्टो[3] नष्टः क्षणार्धेन ॥ ११ ॥

---

१. 'साश्वासम्' इति ख-पुस्तके नास्ति. २. 'जयावस्था' इति क-पाठः. ३. 'दुष्टो' इति ख-पाठः.

तालजङ्घः—हा धिक्, कष्टं भोः । अथ पूतनायाः का वार्ता ।
गर्गः—यापरेषाम् । तथाहि ।

कृत्वा रूपं त्रिभुवनमनोमोहनं पाययन्ती
स्तन्यं हालाहलमयमथानेन निष्पीतसारा ।
हा धिक्कष्टं किमपि सहसा राक्षसी पर्यणंसीत्
हा धिक्कष्टं किमपि सहसा राक्षसी पर्यणंसीत्

तालजङ्घः—(सोत्साहम् ।) ततस्ततः ।
गर्गः—

क्रूरास्फन्दैर्बधिरितजगत्तत्क्षणाच्च व्यरंसीत् ॥ १२ ॥

तालजङ्घः—हा वत्से, अनूष्माणि शलभायितासि ।

घुणेन प्रोत्कीर्णा तदहह शिला वज्रघटिता
न शम्पासंपातात्किमपि शतधाशीर्यत तृणैः ।
विलिल्ये प्रालेयक्षितिरपि न खद्योतमहसा
यदाधत्से वत्से किमपि नरडिम्भादभिभवम् ॥ १३ ॥

(दीर्घमुष्णं च निःश्वस्य ।)

स्वाराज्यैकफले रिपुक्षयमखे देवद्विजाधारके
कंसस्यानुशयानलेऽसुरयशःक्षीराहुतीर्जुह्वता ।
त्वं धाय्या विहितासि हन्त विधिना वत्से न जाने पुनः
का पूर्णाहुतिरुत्तमा तदमुना क्रूरेण कारिष्यते ॥ १४ ॥

गर्गः—तँदपि नातिचिरादेव स्फुटीभावमुपैष्यति । अतिचपलः किल कालकौलेयको नासदुँपेक्षाक्षणक्षेपं क्षमते ।

तालजङ्घः—ततस्ततः ।

---

१. 'अथ' इति ख-पाठः. २. आधारो घृताहुतिविशेषः. 'देवद्विषद्याजके' इति क-पाठः. ३. अग्निसमिन्धनमन्त्रः. ४. 'तदप्यचिरादेव स्फुँटीभॅवितु-मुपैष्यति' इति ख-पाठः. ५. 'उत्प्रेक्षा' इति ख-पाठः.

गर्गः—ततश्च तथा तथोत्पातपरम्परापराभूयमाना व्रजवासिन उपनन्दनाम्ना गोपवृद्धेनोपमन्त्र्य गोकुलादुदुष्य नातिदूरे निरामयं बहलजलं मिलदुलपशबलं वृन्दावनमध्यमध्यूषुः ।

तत्रापि वसता तेन सबलेनाघहारिणा ।
लीलामात्रेण निहताः प्रलम्बबकधेनुकाः ॥ १५ ॥

तालजङ्घः—(सवैक्लव्यम् ।) हा वत्साः, कथमकस्मादेव दशमीं दशामापन्नाः स्थ । (सरोषम् ।) कथमयमतिप्रसजति कालकालकौलेयकः । ननु रे कृतान्तहतक,

विद्वाणेषु दिगीश्वरेषु समिति द्रागुल्लुतिभ्रुकुत-
कुध्यत्कासरतुङ्गशृङ्गविलुतिव्याविद्धगात्रः पतन् ।
कारागारनिकारमाशु गमितः संतर्ज्यमानो भटैः
काकुव्याकुलगीः कृपावशहृदा न त्वं मया मोचितः ॥ १६ ॥

तदधुना न भविष्यति ।

गर्गः—(स्वगतम् ।)

अपि स्यादस्माकं किमपि कुशलं गोकुलभुवां

(निःश्वस्य ।)

कुतो वा कल्याणं प्रकृतिकुटिले राजनि रिपौ ।

(सावष्टम्भम् ।)

अये शान्तं पापं यदि स भगवान्किंचन कृपा-
कटाक्षप्रक्षेपैः क्षपयति विपक्षप्रतिभयम् ॥ १७ ॥

तालजङ्घः—क पुनरिदानीं निर्भराश्चर्यगर्भोऽर्भकाकारस्वर्णिकाप्रच्छन्नोऽघटनघटनापटीयान्नटवपुः साक्षादीक्षणातिथिः स्यात् ।

गर्गः—श्रुतं मया नातिचिरादेव गोकुलोपशल्यमुपेयुषा यत्किल

---

१. 'गोकुलाददूरे बहुलजलं' इति ख-पाठः. २. 'नठमद्भु' इति क-पाठः.

धनुर्यज्ञोत्सवे कृष्णं सबलं मातुलः किल ।
निनीषुर्मथुरामेष क्रूरोऽप्यक्रूरमादिशत् ॥ १८ ॥

तालजङ्घः—सखे, यथादिष्टमनुष्ठीयताम् । अहमपि वृन्दावनपरिसर एवैनमनुसरामि । (इति निष्क्रम्य ।) तदेतद्वृन्दावनम् । अन्वेषयाम्येनम् । (इति परिक्रामति ।)

(नेपथ्ये ।)

रे रे व्रजवासिनः, सावधाना भवत । नन्वयमनुपतति नेदीयानेव

कोपाटोपातिवल्गद्विकटखुरपुटप्रस्फुटद्भूमिपृष्ठा-
दुत्तिष्ठद्भिर्गरिष्ठैर्व्रजजननयनान्यन्धयन्धूलिजालैः ।
कुर्वन्धामेष हेषारवशतबधिरां वालधिं[1] प्रोद्धुनान-
श्चूडावालान्तरालप्रणिहितकपिलक्रूरतारस्तुरंगः[2] ॥ १९ ॥

तालजङ्घः—(सातङ्कम् ।) आः, किमेतत्स्यात् ।

न खलु सुरभिसैरभीसमृद्धे[3] शिशुचलकर्णकृंतर्णकावकीर्णे ।
अतिचकितजनव्रजे व्रजेऽस्मिन्ननुपधिरेष[4] तुरंगमप्रचारः ॥ २० ॥

(पुनर्नेपथ्ये ।)

धावन्धीरं धरायां क्षणमथ विदधद्धौरितं[5] धूतमूर्धा
चञ्चच्चञ्चत्खुराग्रक्षणधरणिरजोघोरणीदुर्विभाव्यः ।
चित्रं चङ्क्रम्यमाणाश्चिरमथ सहसा संभ्रमं बिभ्रदुर्वी-
गर्वागर्वादखर्वाद्विरुजति जनताः सर्वतः पर्वताभः ॥ २१ ॥

तालजङ्घः—(निपुणं निरूप्य ।) नूनमनेन महाराजनिर्दिष्टेनाश्ववर्णिकाप्रच्छन्नमूर्तिना विविधमायावेषपटीयसा केशिना भवितव्यम् ।

---

१. पुच्छम्. २. 'चूला' इति क-पाठः. ३. गोमहिषीसंपन्ने. ४. सद्योजातवत्सव्याप्ते. ५. निश्छलः. ६. चौरितमश्वगतिविशेषः.

(सहर्षम् ।) तदनेन सकलसुरासुरचक्रदुःसहपराक्रमेण तत्क्षणादेवास्मत्प्रतिपक्षः सपक्षो व्यापादयिष्यते । साधु रे केशिन्, साधु । कृतकृत्योऽसि । यतः—

दर्पोद्धुरेषु निहतेषु निशाचरेषु
मायासु मायिनि खिलत्वमुपेयुषीषु ।
कंसस्य भृत्यनिवहैरिह यद्विपक्ष-
पक्षक्षयक्षमतयाद्य विभावितोऽसि ॥२२॥

(पुनर्नेपथ्ये ।)

रे रे गोपालाः, दिष्ट्या जीविताः स्मः ।
परित्यजत साध्वसं भजत धीरतां नेत्रयो-
र्जहीत विनिमीलिकां भवत भूबिलेभ्यो बहिः ।
विदीर्णमुखकंदरोदरनिविष्टमुष्टिक्षत-
क्षरद्रुधिरघोरणिः स निहतो वयस्येन नः ॥ २३ ॥

तालजङ्घः—(ससंभ्रमम् ।) कथं सत्यमेव निहतः । (निपुणं निरूप्य ।) अहह,

वमति रुधिरधारां नासिकानालरन्ध्रा-
ल्लुठति धरणिपीठे क्ष्मां खुराग्रैः क्षुणत्ति ।
घुरति किमपि घोरं केसराण्युद्धुनीते
तदणुमपि विलम्बं न क्षमन्तेऽसवोऽस्य ॥ २४ ॥

हन्त मोः, वज्रसाराणि हृदयानि जीवलोकस्य । यदेवमनेकधा कुलक्षयमध्यक्षयन्नपि प्राणिमि । तदस्मिन्निहते नूनमासन्नमत्याहितं महाराजस्य दैवैकचिकित्सनीयमालोकयामि । यतः—

---

१. श्रीकृष्णे. २. निष्फलत्वम्. ३. श्रीकृष्णेन.

वाचा नाचरितं दृशा न कलितं कर्णेऽपि नाकर्णितं
चित्तेनापि न चिन्तितं न च पुनः स्वप्नेऽपि संभावितम् ।
दैवज्ञैर्न निवेदितं न पिशुनैराशङ्कितं कर्हिचि-
त्तत्ताहग्व्यसनं विधिर्घटयति क्रूराशयः प्राणिनाम् ॥ २५ ॥
तदेनं वृत्तान्तमुपहरामि महामात्यस्य । (इति निष्क्रान्तः ।)

इति द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

(ततः प्रविशति रथारूढोऽक्रूरः सारथिश्च ।)

अक्रूरः—(दीर्घमुष्णं च निःश्वस्य ।) हन्त भोः,
असारे संसारे विषविषमपाकेऽनृतसुखे
कृतान्तेनाक्रान्ते प्रकृतिचपले जीवितबले ।
ध्रुवापाये काये विषयमृगतृष्णाहतहृदः
परप्राणैः प्राणानहह परिपुष्णन्ति कुधियः ॥ १ ॥
अहो, अस्य दितिजकुलकलङ्कस्य कंसस्य निर्विवेकता निर्घृणता च । यतः—

स्वस्रीयेषु हतेषु सप्तसु मनाङ् नाद्यापि निर्विद्यते
ताहक्चेदयमष्टमोऽपि किमितस्त्रासेन संभ्रम्यते[1] ।
कस्त्रातुं प्रभवेद्भवेद्यदि हरिर्हन्तावतीर्णः स्वयं
मृत्यौ जन्मवतां ध्रुवे च मरणं श्रेयः परं श्रीपतेः ॥२॥

(विमृश्य ।) अथवा किमेनमासुरीमतिदारुणां प्रकृतिमाश्रितमुपालभे । ननु तावदहमात्मानमेव ताहशे नृशंसे कर्मणि प्रवर्तमानमाकलयामि । तथा हि—

---

१. 'संभाव्यते' इति ख-पाठः.

राजाराधनतत्परेण सहसा स्वीकुर्वता चासनं
कृत्याकृत्यविचारवञ्चितधिया धर्मोऽपि नापेक्षितः ।
स्पृष्टा नैव घृणा तृणाय च मतो लोकस्त्वयाप्युज्झिता
धिक्कुक्षिंभरिणा मयाद्य कृपणाः प्राणाः परं पोषिताः ॥ ३ ॥

सूतः—आयुष्मन्, कथमयं महाराजो जानन्नपि स्वजनसंबन्धमतिस्नेहपर्याकुलहृदयेन भवता वत्सौ रामकृष्णावुपनिनीषति ।

अक्रूरः—सूत, सोऽयं कुटिलनीतिपण्डितः परस्परमस्मासु विरोधमुत्पाद्य सुन्दोपसुन्दन्यायेन सर्वानिवासान्संजिहीर्षति । तथा हि ।

नानेष्ये यदि तौ ध्रुवो[1] मम वधस्तच्छासनातिक्रमा-
दाहर्तुं यदि यामि वक्ष्यति ततः[2] को वा न मां सौनिकम्[3] ।
निन्देन्नन्दनविप्रयोगविवशो मां नन्दगोपो जरन्-
ज्ञातिर्द्वेक्ष्यति वा चिरादहरहः शप्स्यन्ति गोपाङ्गनाः[4] ॥ ४ ॥

सूतः—आयुष्मन्, अपि नाम महाराजाज्ञागौरवनियन्त्रणात्कथमपि तथोपसीदन्तं तत्रभवन्तं भगवान्वासुदेवो न प्रतीपमाशङ्किष्यते ।

अक्रूरः—सूत, सत्यमात्थ ।

दुर्जनवशवर्तिनमिह चिरतरविरहेण लुप्तसौहार्दम् ।
न प्रत्येति स्वजनं मृग इव मृगयूपसर्पिणं हरिणम्[5] ॥ ५ ॥

तथापि ।

सर्वान्तरात्मा भगवान्सर्ववृत्त्यवबोधकः[6] ।
न मामनन्यशरणमन्यथा प्रतिपत्स्यते ॥ ६ ॥

---

१. 'ध्रुवं' इति ख-पाठः. २. 'ततः' इति ख-पाठः. ३. हिंसकम्. ४. वृद्धः. ५. 'मृगयूथसर्पिणं' इति क-पाठः. मृगयुर्व्याधः. ६. 'मूर्त्यवबोधकः' इति ख-पाठः.

सूतः—आयुष्मन्, प्रत्यासीदति सायंतनः समयः । तत्त्वर्यताम् । रामकृष्णावलोकनेन नयने सफलयावः ।

अक्रूरः—(क्षणं ध्यात्वा सहर्षम् ।) हन्त भोः, स एष दारुणतरे दारकाहरणकर्मणि नियुञ्जानेन महाराजेन प्रयुक्तो निग्रहोऽप्यनुग्रहायैव कल्पिष्यते मयि । अद्य खलु

कुवलयदलदामश्यामकान्तिः कलावा-
न्नयनचुलुकनीयः कोऽपि पीयूषराशिः ।
व्रजपरिसरधूलीकेलिलोलः किशोरा-
कृतिकृतिपरिचेयो द्रक्ष्यते ब्रह्मसारः ॥ ७ ॥

सूतः—(प्रतीचीमवलोक्य ।) आयुष्मन्, [1]पश्य ।

अहरखिलमशेषज्योतिषामेकशेषः
सकलभुवनवृत्तीः कर्मसाक्षी निरीक्ष्य ।
रथतुरगरजोभिः काञ्चनैः क्रान्तकायो
जलधिमं[2]भिनिमङ्कुं भानुमानाजिहीते ॥ ८ ॥

अक्रूरः—(सहर्षम् ।) सखे, साधु समुचीतम् ।

[3]अधिवनमभिधावद्गोखुरोद्धूतधूली-
शबलविमलगात्रः स्फीतपीताम्बरश्रीः ।
व्रजपरिसरमेष्यद्भ्योतिषां ज्योतिरेकः
सफलयति कदा नश्चक्षुरिन्दीवराक्षः ॥ ९ ॥

सूतः—

अस्तं [4]यतापि किल मस्तकवर्तिनासां-
वस्ताचलोऽहिमरुचा रुचिमभ्यलम्भि ।

---

१. 'पश्य तावत्' इति क-पाठः. २. 'अधिनिमङ्कुं' इति क-पाठः. ३. 'अभिवन' इति ख-पाठः. ४, गच्छतापि.

प्रायः परोपकृतये कृतिनोऽनपेक्ष्य
स्वार्थं विपत्कवलिता अपि संघटन्ते ॥ १० ॥

अक्रूरः—(निपुणं निरूप्य । सानन्दम् ।)

अहिमकरमरीचिधातुरागैः शबलितमम्बुदमण्डलं दधानः ।
अनुहरति गिरिस्तुलां मुरारेर्वलयितचित्रशिखण्डमण्डनस्य ॥ ११ ॥

सूतः—अहह, असमञ्जसम् ।

अयमुदयमहीभृन्मस्तकन्यस्तपादः
खरतरकरदुःस्थां प्रौढिमाढौकमानः ।
दिवसमणिरथोच्चैर्द्राक्परां प्राप्य काष्ठा-
महह विधिविरोधादम्बुधौ मज्जतीति ॥ १२ ॥

अक्रूरः—सूत, साधूत्प्रेक्षितम् । तथा हि ।

निर्मज्ज्याधिपयोधि भर्तरि रुचां लोकान्तरं प्रस्थिते
संध्यामिं विशति प्रमीलति [1]निजेऽम्भोजे दिनश्रीरियम् ।
यत्काष्ठाकर एष रज्यति तमोधूमोऽश्नुते रोदसी
संक्रन्दन्ति खगाः समेत्य ददते विप्राश्च तोयाञ्जलीन् ॥ १३ ॥

(पुनः सूतं प्रति ।) अये, बंहीयानतिवाहितः पन्थाः । तदधुनापि कियदन्तरं नन्दवाटस्य ।

सूतः—आयुष्मन्, इतो नेदीयानेव लक्ष्यते । [2]तदुपगतप्रायाने-वास्मानवगच्छ । तथाहि निरूपयत्वायुष्मान् ।

अधितरणितनूजातीरवानीरपाली-
परिसरमतिकाली भाति तालीवनाली ।
विलसति तददूरेऽतुच्छतापिच्छगुच्छा-
वलिवलयितवल्लीवेल्लिता नन्दपल्ली ॥ १४ ॥

---

१. 'निजाम्भोजे' इति ख-पाठः. २. 'तदुपात्तप्राया' इति ख-पाठः.

अक्रूरः—(निपुणं निरूप्य । ससंभ्रमम् ।) सूत, संभावयामि तावत् ।

गिरिशिखरविरूढप्रौढहिन्तालमाला-
पिहितगगनगर्भभ्राम्यदूर्जध्वजाग्रः ।
विहगविहतवेगव्यग्रशाखाकराग्रै-
स्त्वरयति परिरब्धुं नन्दघोषः किमस्मान् ॥ १५ ॥

सूतः—(किंचिदन्तरं गत्वा रथवेगं नाटयन् । पुरोऽवलोक्य ।) आयुष्मन्,

उपवनतरुखण्डहिण्डमानाण्डजततिभिर्गृहमेधिहोमधूमैः[1] ।
अपि च शिशुपशूद्धतै रजोभिः किमपि पुरस्तिमिराद्वयं चकास्ति ॥ १६ ॥

(पुनः सविषादम् ।) हन्त भोः,

अस्तमिते दिननाथे चिरयति चन्द्रे स्फुटासु तारासु ।
सहसा तमःप्रधानैर्व्याकुलितं हन्त भूतलं तरलैः ॥ १७ ॥

तथा हि ।

तमःश्यामे व्योम्नि स्फुटकनकलेखाङ्कुरचय-
प्रभा विद्योतन्ते निकष इव खद्योतनिकराः ।
सहस्रांशोरंशा इव चरमशैलव्यतिकरा-
द्विशीर्णाः पर्यस्ताः पथिकपृथुनिःश्वासपवनैः ॥ १८ ॥

अक्रूरः—सूत, साधु समर्थितम् । तथा हि ।

मेचकद्युतिदलान्तरलीनज्योतिरिङ्गणचमत्कृतिरम्याः[2] ।
पादपा इव चकासति मेरोः क्ष्मां गता इव हरिन्मणिकूटाः ॥ १९ ॥

(कर्णं दत्त्वा । सहर्षम् ।) हन्त भोः,

स्नेहप्रस्रुतपीवरस्तनभरप्राग्भारभूरिक्षर-
त्क्षीरक्षालनपिच्छिलैः प्रतिपदं मार्गैर्निषिद्धत्वराः ।

---

१. भ्रमत्पक्षिसमूहैः. २. 'खद्योतो ज्योतिरिङ्गणः.'

हर्षोत्पुच्छयमानतर्णकरवोत्कर्णा व्रजायोत्सुका
गोसंघाः प्रतिहुंकृतैरिह मुहुः श्रोत्रोत्सवं कुर्वते ॥ २० ॥

सूतः—आयुष्मन्,

चारणेन परिचर्य समन्तादद्रिकाननदरीः परिपूय ।
संप्रति प्रतिनिवर्तयितासौ गोधनानि किल गोकुलनाथः ॥२१॥

तथा हि । आकर्णयत्वायुष्मान् ।

चम्पे चन्दनि चन्द्रिके चमरिके चन्द्रावलि श्यामले
गङ्गे गोमति गौरि गीतरसिके गायत्रि गोदावरि ।
धीरे धीवरि धूसरे धवलिके कालाक्षि कालीति च
व्याहाराः परितो हरन्ति हृदयं हैम्बारवाश्राविणः ॥ २२ ॥

अक्रूरः—(कर्णं दत्त्वा । सानन्दम् ।) सूत, इतोऽपि रमणीयमाकर्ण्यते ।

अनुसृतकरतालैर्वेणुवीणानुयातै-
र्मुखरितकलशृङ्गैर्डिम्भडम्फाभिरामैः ।
मधुरमधुरगीतैर्हुंकृतैर्गोधनाना-
मिदमुदयति नादाद्वैतमानन्दसान्द्रम् ॥ २३ ॥

(पुनः कर्णं दत्त्वा ।)

क्षीरस्यावेगधावद्वृषभनिपतितस्तन्यपानोर्जदोजः-
कूर्दद्वत्सावरोधव्यसनिशिशुशताकूतकोलाहलाढ्यः ।
गम्भीरामीरकुम्भीकुहरपरिणमद्धीरगोक्षीरधारा-
ध्वानोऽध्वन्यध्वगेभ्यः पिशुनयति चिरादेष गोष्ठस्य गोष्ठीः ॥ २४ ॥

सूतः—(सोत्साहम् ।) अहह, संप्रति

---

१. चम्पे इत्यादीनि धेनुसंबोधनानि. २. हम्बा धेनुशब्दः. ३. शृङ्गडम्फादयो वाद्यविशेषाः.

हुंकृतभांकृतहीहीहीकृतधुंधुंधुमारवैर्मुखराः ।
व्याकुलबालकगोकुलवत्सकुलैः संकुलाः ककुभः ॥ २५ ॥

अक्रूरः—सूत, समासादितप्रायास्तदिदानीं नन्दघोषोपशल्यभूमयः । तत्संयम्यन्तां प्रग्रहाः । यावद्रामकृष्णचरणनलिनविन्यासपूतपांसुसंपर्कादात्मानं पवित्रयन्तौ पादचारेण गोपुरपरिसरशिखरमारुह्य नन्दनन्दनानुगमनमनुपालयावः ।

सूतः—साधु मन्त्रितमायुष्मता । तदेते संयता वाजिनः । समवतरत्वायुष्मान् ।

(इति रथादवतरणं नाटयतः ।)

अक्रूरः—(पुरतो निरूप्य । सवितर्कम् ।) अये, कथमियं

व्रजपरिसरभूमिष्वापतद्गोखुराग्र-
क्थनसिकतिलासु व्यक्तपद्मध्वजश्रीः ।
समविषमनिपाता शैशवं व्यञ्जयन्ती
स्मरयति पदपङ्क्तिः कापि कस्यापि पुंसः ॥ २६ ॥

(ध्यानं नाटयित्वा । स्वगतम् ।)

एतद्रूढं सत्समूहैरमूढैर्योगारूढैर्यत्कथंचित्समूढम् ।
लीलोन्मीलद्विम्भदम्भस्य विष्णोर्वन्दे वेदान्तैकवेद्यं पदं तत् ॥ २७ ॥

(नेपथ्ये कलकलः ।)

अक्रूरः—(कर्णं दत्त्वा ।) अये, कथमयमिदानीं

कासांचिन्नयनाञ्चलं विचलयन्नाभारिवामभ्रुवां
दोर्वल्लीरिह दोहते विकलयन्मौलिं मुहुर्दोलयन् ।
अन्तः कन्दलयन्नमन्दममलामानन्दकन्दावलीं
विघ्नौघं दलयन्मुरारिमुरलीनालीरवः श्रूयते ॥ २८ ॥

---

१. 'अथेयम्' इति ख-पाठः. २. 'मनसां' इति ख-पाठः.

(परिभाव्य, स्वगतम् ।)

तावन्माध्वीक साध्वी भवतु तव कथा क्षीरपूरासि वन्ध-
स्तावत्तावच्चकोरी चुलुकयतु चिरं शीतरोचिर्मरीचीन् ।
तावत्पीयूषयूषैर्विदधतु विबुधास्तोषपोषं कथंचि-
द्यावन्नाकर्णितैषा मधुरिपुमुरलीमाधुरीसाधुरीतिः ॥ २९ ॥

(सहसा परावृत्य पुरोऽवलोक्य । सहर्षम् ।) अये, कथमियमित एव

मुखरितकलभृङ्गीमाधुरीसाधुरीति-
क्षरदधरमधूलीमोहिताशेषविश्वः ।
अमलतमतमालश्यामलः कोमलाङ्गः
समुपसरति नेत्रानन्दनो नन्दसूनुः ॥ ३० ॥

(चिरं विभाव्य ।) कथमयमतिमानुषपौरुषो बाललीलाकलेवरावृतोऽप्यना-वृतब्रह्मास्वादसोदरानन्दमेदुरामुदञ्चयति चेतसो वृत्तिम् । (नेत्रे निमील्य ध्यानं नाटयन् ।)

त्वं क्षीराम्बुनिधिं ममन्थिथ जगत्त्रातुं जघन्थासुरा-
न्दंष्ट्राग्रेण समुज्जहर्थ धरणिं सुष्वप्थ शेषे सदा ।
दूरे तस्थिथ किं च वाङ्मनसयोः किं त्वेष नः प्राक्तनैः
पुण्यैरद्य पचेलिमैः किल बलात्पुंभावमालम्बसे ॥ ३१ ॥

सूतः—आयुष्मन्[2], पश्यैतत् । प्रातः प्रोषितयो रामकृष्णयोः प्रत्यागमनमनुपालयन्तौ जरन्तौ यशोदानन्दगोपौ संभृतातिथ्यसंभारा-वित एवाभिवर्तेते । तदेतयोः प्रत्यनन्तरीभूय यथेष्टगोष्ठीसमागमसु-खमनुभवावः ।

अक्रूरः—सूत, एवमेतत् । तदेहि । गोपुरपरिसरमेवानुसरामः ।

(इति निष्क्रान्ताः सर्वे ।)

इति तृतीयोऽङ्कः ।

---

१. 'पीयूषपानैः' इति ख-पाठः. २. 'भगवन्' इति ख-पाठः.

चतुर्थोऽङ्कः ।

(ततः प्रविशति वेत्रपाणिः पुरुषः ।)

पुरुषः—आदिष्टोऽस्मि तत्रभवता पुरोधसा गर्गेण[1] यत्किल मातुलालयाय प्रवत्स्यतोर्वत्सयो रामकृष्णयोस्तारानुकूल्यं परिज्ञातुं दैवज्ञमाज्ञापयेति । तदेनमनुसरामि[2] । (नेत्रे निमृज्योर्ध्वमवलोक्य ।) अये, विभातप्राया विभावरी । तथा हि—

तमस्तोमज्योत्स्नारुणकिरणकिर्मीरितरुचि-
र्नभोलक्ष्मीरेषा जयति जगदुज्जीवनकरी ।
निशाकल्पे लीनं पुनरपि सिसृक्षोस्त्रिभुवनं
विधातुः सृष्ट्यादौ प्रकृतिरिव वर्णत्रयमयी ॥ १ ॥

(पुनर्निरूप्य ।)

इतः शुक्ला चन्द्रद्युतिभिरिह रक्तारुणकरै-
स्तमिस्रैरप्यन्तःस्खलितगतिभिर्मेचकरुचिः ।
प्रभातश्रीरेषा विलसति पुरःस्था सुकृतिनां
मिमङ्क्षूणां[3] जह्नुद्युमणिविधिजासंगम इव ॥ २ ॥

(पुरोऽवलोक्य ।) कथमयं दैवज्ञः प्राचीनगोपुरशिखरमध्यमध्यारूढो मित्रोदयं प्रतीक्षमाण आस्ते[4] । तद्यावदुपसर्पामि । (गतिवैकल्यमभिनीय । स्वगतम् ।)

न जराजर्जरैरङ्गैरेतां सोपानपद्धतिम् ।
आरोढुमवरोढुं वा मनागुत्सहते मनः ॥ ३ ॥

अहह, कथं दुर्दैवेन दुःस्थामेनामवस्थां प्रतिलम्भितोऽस्मि । तथा हि—

---

१. 'गार्ग्येण' इति क-पाठः. २. 'अनुसरामीति' इति ख-पाठः. ३. जह्नुद्युमणिविधिजा गङ्गायमुनासरस्वत्यस्तत्संगमे प्रयागे मिमङ्क्षूणां स्नातुमिच्छताम्. ४. 'प्राचीनप्राची' इति क-पाठः.

अन्यत्रेहितमन्यतो निपतति क्लेशादुदस्तं पदं
सुष्टिर्न क्षमते क्षणं कलयितुं यष्टिं पृथोर्वेपथोः ।
न श्रोत्रे शृणुतश्चिराय परितस्तारस्वरं व्याहृतं
धिक्कष्टं जरसातुरस्य मरणं मन्ये महानुत्सवः ॥ ४ ॥

हन्त भोः,

गलति वदने लाला वाचः स्खलन्त्यपरिस्फुटाः
स्रवति सततं चक्षुर्नासं न संचरतः पदे ।
मुखमदशनं दृष्टिः शून्या वृथा च विचेष्टितं
शिव शिव जरा बाल्यं भूयः प्रसौति नवं नवम् ॥ ५ ॥

अपि च ।

अन्योक्त्या परिचिन्वते परिजनान्संचार्यमाणाः परैः[1]-
स्कन्धन्यस्तभुजाश्चिरेण चरैः[2]णाक्षेपं समातन्वते ।
न स्वैनैव कृतं स्मरन्ति सहसा क्रुध्यन्ति निष्कारणं
वृद्धव्याधितभूभुजः किल समावस्था विधात्रा कृताः ॥ ६ ॥

तदिहस्थ एवैनमाहूय निवेदयामि पुरोधसो निदेशम् । (इति बाहु[3]मुत्क्षिप्याह्वयति ।)

(प्रविश्य ।)

दैवज्ञः—(सहर्षं स्वगतम् ।) कथं क्षणमपि व्याक्षेपासहिष्णवो महतां मनोरथाः । यतः प्रस्थानोत्सुकयोर्वत्सयो रामकृष्णयोरतिप्रशस्ततरो यात्रामुहूर्त उपस्थेव समुपस्थितः । तथा हि—

चन्द्रः पुष्यगतस्तृतीयभवने सिद्धिप्रदो दक्षिणः
केन्द्रस्थाः कथयन्ति सौम्यस्वचरा योगाधियोगं शुभम् ।

---

१. 'परं' इति क-पाठः. २. 'चरणाक्षेपे समारम्भिणः' इति क-पाठः. ३. 'बाहू' इति ख-पाठः

अम्भःसंभृत एष कुम्भनिवहो वेश्याशिरःस्थः पुरः
प्रस्थाने कथयन्ति शात्रववधं सर्वेऽर्थसिद्धिं तथा ॥ ७ ॥
तत्सत्वरमुपसृत्य यात्रोचितमङ्गलचारोपकरणान्युपाहरामि । (इति ससंभ्रममवतीर्य पुरोऽवलोक्य ।) अये, कथमयमन्तःपुरप्रतीहारो रत्नापीड इत एवाभिवर्तते । तंदस्मान्निशीथवृत्तं नन्दाक्रूरयोः संवादमवगच्छामि । (इत्युपसर्पति ।)

दैवज्ञः—अये रत्नापीड, कथमर्धोन्मीलितलोचन एव संचरन्नतिघूर्णमानानामङ्गानामनीश्वर इवावलक्ष्यसे ।

रत्नापीडः—किं भणामि । कष्टात्कष्टतरः खलु परप्रेष्यभावः । यतः—

श्रान्तोऽपि हन्त रजनीगुरुजागरेण
कार्यातिपातचकितो न शये क्षणार्धम् ।
भ्रूभङ्गवीक्षणवितर्कितचित्तवृत्ति-
र्नित्यानुवृत्तिनिरतः प्रभुवृत्तमीक्षे ॥ ८ ॥

दैवज्ञः—तत्कथय कारणं रात्रिजागरणस्य ।

रत्नापीडः—सखे, किं न जानासि ।

अक्रूरागमसंभ्रमादुपहृतैरातिथ्यसंभावना-
संभारैरतिवाहितो न विदितः पूर्वोऽर्धरात्रो मया ।
विश्लिष्यत्सुतसंज्वरातुरजरद्गोपप्रमीलामिल-
च्छोकस्त्रीपरिसान्त्वनैर्नयनयोरेव प्रभाता निशा ॥ ९ ॥

दैवज्ञः—हन्त भोः, कथं हर्षस्थाने विषादावसरः । यतः प्रिया-

---

१. 'तस्मात्' इति ख-पाठः. २. 'अभिलक्ष्यसे' इति क-पाठः.

म्रियेमतः किल मातुलावासवासो भागिनेयानाम्, भगिनीनां च भर्तृ-पक्षात्पितृपक्षे पक्षपातो बंहीयानेव ।

रत्नापीडः—आः कथमनेकधाध्यक्षयन्नप्यमीषां प्रेमबन्धपरिपाक-मनभिज्ञ इव पृच्छसि । न जानासि किं मातुलवार्णिकाप्रतिच्छन्नोऽ-यमसुरोत्तंसः कंसो वासुदेवाय द्वेष्यन्वसुधामधिवसति । तदेवं तयोरप्र-तीकारमत्याहितमुपस्थितमवगच्छामि ।

दैवज्ञः—सत्यमात्थ, किं तु न संभावयामि परमभागवतेन मनी-षिणा प्रियसुहृदाक्रूरेण प्रत्यनन्तरीभूय नीयमानयोरनयोः किमप्यमङ्ग-लम् । न खल्वयमणुमपि राज्ञो दुराशयमवगत्य विपाकदारुणं दूत्यक-र्माङ्गीकुर्यात् ।

रत्नापीडः—आः, कथमविदग्धमुग्धमतिरसि । नेह्यस्त्यकर्तव्यं नाम परप्रेष्यभावमापन्नानाम् । राजानुवर्तिनां पुनर्विशेषेण । ते हि राजानुरञ्जनमेव बहुमन्यमानाः—

क्षमां सत्यं दयां धर्मं घृणां लोकभयं दमम् ।
विस्मृत्य केवलं राजरञ्जनं पर्युपासते ॥ १० ॥

दैवज्ञः—महाशयः खल्वक्रूरो न दुराशयमनुसरिष्यति ।

रत्नापीडः—(विहस्य ।) किं न पश्यसि ।

अन्तर्मलिनसंसर्गाच्छुतवानपि दुष्यति ।
यच्चक्षुःसंनिकर्षेण कर्णोऽमूत्कुटिलाशयः ॥ ११ ॥

दैवज्ञः—(निमित्तं सूचयित्वा ।) शान्तं पापम् । प्रतिहतममङ्गलम् । स्वस्त्यस्तु गोकुलवासिभ्यः ।

---

१. 'प्रियतरः' इति ख-पाठः. २. 'नह्यस्त्यकर्मविचारणं नाम' इति ख-पाठः. ३. 'राज्ञां रञ्जनं' इति ख-पाठः. ४. 'खल्वसौ' इति ख-पाठः. ५. 'पश्यामि' इति क-पाठः. ६. 'कुटिलाश्रयः' इति ख-पाठः.

(नेपथ्ये कलकलः ।)

रत्नापीडः—(सादरमाकर्ण्य । प्रकाशम् ।) सखे, अवधीयताम्[1] । यथायं मधुरमुरजवेणुवीणाशङ्खकाहलबहलकोलाहलान्तरालोन्मीलत्प्रचुरपुरंध्रीसमाजमङ्गलाचारगीतध्वनिरुपगोपुरमुच्चैरुच्चरति, तथा तर्कयामि प्रस्थितौ रामकृष्णाविति । तद्यावत्प्रत्यनन्तरीभूय प्रास्थानिकोपदासंपत्संपादनेन सपुत्रौ गोपवृद्धौ परिचरावः ।

(इति निष्क्रान्तौ ।)

प्रवेशकः[2] ।

(ततः प्रविशतो रामकृष्णौ, सुदामाक्रूरावलम्बितौ यशोदानन्दगोपौ च ।)

यशोदानन्दगोपौ—

हा वत्स राम रमणीयमुखारविन्द
हा कृष्ण वृष्णिकुलकैरवकाननेन्दो ।
क्व स्थः समेत्य सहसा परिरभ्य गाढ-
मङ्गानि शीतलयतं परितप्ततयोर्नौ ॥ १२ ॥

(इति मूर्च्छां नाटयतः ।)

अक्रूरः—(वसनाञ्चलेन वीजयन् ।) गोपवृद्धौ, समाश्वसितम् । अनवसरः खल्वयं शोकस्य[3] । ननु प्रवत्स्यतोर्वत्सयोः प्रवर्त्यतां मङ्गलाचारः ।

गोपवृद्धौ—(समाश्वस्य । सोपालम्भम् ।) हन्त भोः,

उत्पत्तिप्रभृति प्रतिक्षणमतिप्रीत्या मयाराधिता
यूयं बल्युपयाचितव्रतमहादानोपदानैः सुराः ।
धिक्कष्टं कथमेष तस्य विषमः पाकः पुरः प्रोतभू-
द्यद्वत्सौ समुपाहरामि बलये कंसाय विश्वद्रुहे ॥ १३ ॥

---

१. 'विधीयताम्' इति ख-पाठः. २. 'प्रस्तावना' इति क-पाठः. ३. 'नावसरः खल्वेष शोकावेशस्य' इति ख-पाठः.

(रामकृष्णावुपसृत्य पादयोः पततः ।)

अक्रूरः—गोपवृद्धौ, प्रवत्स्यन्तौ रामकृष्णौ भवन्तावभिवादयेते ।
तत्प्रस्थानोचिताभिराशीर्भिरभिवर्धयतमेतौ ।

गोपौ—(साश्रुवर्षम् ।) हा वत्सौ, क्व वर्तेथे । न खलु कथंचित्परि-
भावयितुमीशावहे युवाम् ।

शोकोद्वेलविलोलबाष्पसलिलप्रस्निष्टदृष्टी[1] जरा-
जीर्णावुज्झितपाटवेन्द्रियगणावन्धौ निमग्नौ शुचि[2] ।
आवां सौनिकदारुणेन विधिना प्रस्थापयन्तौ युवां
हस्तेनाप्यतिवेलवेपथुभृता न स्प्रष्टुमीशावहे[3] ॥ १४ ॥

(रामकृष्णावुपसृत्य पित्रोरङ्कमधिरोहतः । तयोर्नयने उन्मार्जयन्तौ ।)

आगर्भसंभवादसच्चिन्तासंतापितान्तयोः ।
पित्रोः क्लेशाय नौ जन्म केवलं किल गोकुले ॥ १५ ॥

तदद्य भवन्तौ सप्रणयप्रणाममनु प्रार्थयावहे ।
संमान्य मातुलादेशं द्रक्ष्यामो न चिरेण वाम् ।
युष्मद्बाष्पाम्भसा यस्मादभिषिक्तौ तदास्पदे ॥ १६ ॥

वृद्धगोपौ—यथाभिरुचितमायुष्मतोः ।
वाता वान्तु शिवा दिशश्च विदिशः सन्तु प्रसन्नाः सदा
नद्यः शीतजलाः स्रवन्तु तरवः पुष्णन्तु सत्संपदः ।
पन्थानः सिकतोत्तरा विदधतु क्षेमं च निष्कण्टका
देवश्चक्रधरश्च तत्रभवतोर्विघ्नान्विजेष्णीयताम् ॥ १७ ॥

अक्रूरः—प्रतिगृह्यतामाशिषः पित्रोः । अतिपतति यात्रामुहूर्तवेला ।

रामकृष्णौ—शिरसा गृहीताः । (इति निष्क्रान्तौ ।)

---

१. 'प्रस्लिष्ट' इति ख-पाठः. २. शोके. ३. 'ईहामहे' इति क-पाठः.
४. 'बाष्पभरैः' इति ख-पाठः.

नन्दः—(चिरं दूरमवलोक्य ।) आर्ये, कथमतिक्रामतो लोचनपथं वत्सौ । तदिदानीमनीशोऽसि शोकविक्लवान्यङ्गानि वोढुम् । (इति मूर्च्छितः पतति ।)

यशोदा—*अज्ज, समस्ससिहि समस्ससिहि । अज्जुत्तं दाणिं सोइउम् । अमङ्गलं खु एदं पवसिदाणम् । ता वड्ढावेहि सुहासीहिं । मणावह कुलदेवदाओ । अच्चिअन्दु सोत्थिवाअणिआ बम्हणा । दिज्जन्तु वायणाइं सोहग्गिणीणम् । जह वच्छाणं कल्लाणमप्पडिहदं भोदि । ता गच्छामो लहु लहु घरसंणिवेसम् । (इति नन्दमवष्टभ्य प्रतिष्ठते ।)

नन्दः—अये,

दूरं गतोऽपि हृदये विनिविष्ट आस्ते
संवीक्ष्यते च पुरतः परितः प्रसर्पन् ।
तत्किं ममैष मतिविभ्रम एव वा स्या-
द्यत्प्रस्थितो मधुपुरीं मधुभित्सरामः ॥ १८ ॥

(स्मृतिमभिनीय ।)

मर्माण्युच्चैर्व्यथयति मनो हन्त मश्नाति यत्ना-
द्धैर्यग्रन्थिं श्लथयति सखे किं च मुष्णाति तृष्णाम् ।
कष्टं दृष्टिं तिरयति हरेर्बालकेलीकलापो-
ऽकस्मादसत्स्मृतिशताशिरःशेखरीभूय भूयः ॥ १९ ॥

---

*आर्य, समाश्वसिहि समाश्वसिहि । अयुक्तमिदानीं शोचितुम् । अमङ्गलं खल्वेतत्प्रवसितानाम् । तद्वर्धापयस्व शुभाशीर्भिः । मानयस्व कुलदेवताः । अर्च्यन्तां स्वस्तिवाचनिका ब्राह्मणाः । दीयन्तां वायनानि सौभाग्यवतीनाम् । यथा वत्सानां कल्याणमप्रतिहतं भवति । तद्गच्छावो लघु लघु गृहसंनिवेशम् ।

यशोदा—(संस्कृतमाश्रित्य ।) आर्य, दुष्प्रवेशः खल्वेष घोरतरो घोषप्रदेशः । तथा हि—

नार्यो रुदन्ति न रुवन्ति पतंगसंघा
गावस्तृणानि न चरन्ति न वान्ति वाताः ।
भृङ्गाः पिबन्ति न मधूनि हरौ प्रयाते
निर्जीविता इव दिशः प्रतिभान्ति शून्याः ॥ २० ॥

तदद्य वत्सप्रवासशोकावेशविक्लवमात्मानमात्मनैवावष्टभ्य व्रजवासिनो लोकान्परिसान्त्वयावः ।

(इति निष्क्रान्तौ ।)

(ततः प्रविशतो रामकृष्णौ ।)

रामः—(प्राचीमवलोक्य ।) कथमुदितभूयिष्ठ एव भगवान्किरणमाली । तद्यावदेनमुपतिष्ठे । (अञ्जलिं बद्ध्वा ।)

दिवसश्रीविजयजयन्मणिमयनीराजनामलस्थानम् ।
दिनकरमङ्कुरितांशुं विकचजपापुञ्जमञ्जुलं वन्दे ॥ २१ ॥

कृष्णः—आर्य, कथमयं गगनपथपान्थो भगवानतिदूरमुज्जिहासमानोऽप्युदयगिरिविरहपर्युत्सुक इव मन्थररथारोहणसुखमनुभवति । तदुत्प्रेक्षे—

मधुरमधुरभृङ्गीगीतसङ्गीतभङ्गी-
समसमुदयमङ्गीकृत्य सन्मङ्गलानि ।
त्रिभुवनमभिषेकात्पङ्किलं कुङ्कुमाद्भिः
समुपसरति मन्दं मन्दमम्भोजबन्धुः ॥ २२ ॥

रामः—अहं पुनरेवमुत्प्रेक्षे—

निशामशेषामुपभुज्य वारुणीं प्राचीमुपेत्याथ तयावधीरितः ।
तदङ्गिलाक्षारसरञ्जिताङ्गको मन्दं विनिर्याति तदङ्गणाद्बहिः ॥ २३ ॥

अथवा ।

ताराः पारदगोलका इह नभःकाचोच्चकुप्यां क्षणं
न्यस्ताः संहतिमेत्य सान्द्रकिरणैश्चन्द्रभ्रमं कुर्वते ।
अप्येताः सकलां निशां परिपतद्दीपाग्निपाकक्रमा-
त्प्रातः सिद्धरसात्मना परिणमन्त्यादित्यविम्बच्छलात् ॥ २४ ॥

(परितोऽवलोक्य सहर्षम् ।) कथममी तरुणतरणिकिरणरञ्जितशिखरराजि-राजितशाद्वलाभोगभासिनो भूमिभागाः । तथा हि—

तरणिकिरणलेशाः शक्रगोपप्रकाशा-
स्तरुणतृणशलाका श्लेषिणः संविभान्ति ।
अभिनवरविबिम्बस्पर्धयार्द्रापराधा
इव मरकतशूलेष्वर्पिताः पद्मरागाः ॥ २५ ॥

अक्रूरः—(समन्तादवलोक्य । सकौतुकम् ।) **भगवन्कृष्ण, इतः पश्यतु भवान् ।**

सजलजलदनीलं त्वामुदीक्ष्योर्ध्वकण्ठा-
नटति विततबर्हं मण्डली बर्हिणानाम् ।
मधुरमधुरकेकाराविणी बन्धुबुद्ध्या
समुपसरति बर्हापीडिनं संभ्रमेण ॥ २६ ॥

सुदामा—इदमपरमुदीक्ष्यतामायुष्मान् ।

उत्कर्णतर्णककुलाकुलितानि दोग्धुं
संदानितान्यपि भवन्तमनुद्रवन्ति ।

---

१. 'सौरकिरणैः' इति क-पाठः. २. 'शाद्वलभाग' इति ख-पाठः. ३. 'इत इतः' इति क-पाठः. ४. 'भगवान्' इति ख-पाठः.

उत्पुच्छमुन्मुखमुदश्रु कृतार्तनाद-
मात्मानपेक्षमभितः किल गोधनानि ॥ २७ ॥

रामः—(परितोऽवलोक्य । सहर्षम् ।) आयुष्मन्, इतोऽवलोक्यताम्।

नेदीयांसस्तरणितनयातीरवानीरकुञ्जा
गुञ्जन्मञ्जस्वरमधुकरारावि॑णः स्वागतेन ।
पान्थानस्मानुचितमतिथीनाह्वयन्तीव शाखा-
हस्तन्यस्तैः फलकिसलयैरानमन्तः समन्तात् ॥ २८ ॥

(किंचिदन्तरं गत्वा चिरं निरूप्य ।) इदं चापरमनुरूपं निरूपयंत्वायुष्मान्।

अधिरजनि निरुद्धोद्भ्रान्तभृङ्गातगुञ्जा-
रवमुखरितगर्भा भान्त्यमी पद्मकोषाः ।
निभृतमनुभवन्तोऽनाहतं नादमन्त-
र्विजितपवनवेगाः किं नु योगाधिरूढाः ॥२९॥

कृष्णः—(कलिन्दनन्दिनीं विलोक्य निर्वर्ण्य सोन्मादम् ।) सखे सुदामन्,

पश्यन्नेतां चपलशफरीलोचनां पङ्कजास्यां
कोकद्वन्द्वस्तनभरनतां बालशैवालकेशीम् ।
भृङ्गश्रेणीमधुरवचनां राजहंसप्रचारां
व्यासक्तोऽपि क्षणमिह पुनः प्रेयसीं स्मारितोऽस्मि ॥ ३० ॥

(तीरवनराजिं विलोक्य सविश्रब्धम्[1] ।)

मधुरमधुरमेतत्कूजितं कोकिलानां
किमथ नगरनारीमञ्जुमञ्जीरनादः ।

---

१. 'सविश्रमम्' इति ख-पाठः.

इयमपि नवगुच्छस्वच्छवक्षोजकान्तिः
सलयकिसलया वा कापि कान्ता लता वा ॥ ३१ ॥

सुदामा—इत इतस्तमालमालाविलोकनेन मनो विनोदयत्वा-युष्मान् ।

कृष्णः—(समन्तादवलोक्य ।) सखे,

उद्यच्छिलीन्ध्रमरविन्दसुगन्धबन्धु-
मन्दानिलं निचुलकुञ्जमिलन्मिलिन्दम् ।
उत्पश्यतो भवति हन्त दुरन्तचिन्ता-
संतापसंततिनिदानमिदं वनं मे ॥ ३२ ॥

सुदामा—(स्वगतम् ।) कथमत्यावेगो विरहस्य । तदेनं रहस्यवि-श्रम्भालापैर्विनोदयिष्यामि । (प्रकाशम् ।) आयुष्मन्, अतिदूरमारूढः प्रौढप्रतापस्तपनः । तदस्मिन्विविक्ते बालशैवालशीतले शिलातले समु-पविश्य ललाटंतपां माध्याह्निकीं वेलामतिवाहयामः ।

कृष्णः—साधु संविहितम् । ममाप्येष मनोरथः । तत्पुरोभूय निर्दर्शय[1] सोपानपथम् । आर्यमक्रूरं[2] मद्वचनेन विज्ञापय, यदतिक्रामति माध्याह्निकी संध्या तदनुष्ठीयतां तदुचितं कर्मेति । तदुपरोधापराधपरि-हाराय पॅरिपालयामि[3] तीरपरिसरसरसदेशपरिशीलनेन । आर्यबलदेवश्च देवपूजोपयोग्यॅानि[4] तिलकुशकुसुमादीन्युपाहरन्भवन्तं परिचरिष्यति । तावदहमपि सुहृद्वियोगविक्लवमात्मानं सुदाम्ना वयस्येन समं स्वजनक-थालापलीलाभिर्विनोदयिष्यामीति ।

सुदामा—यदादिशत्यायुष्मान् । (इति तथा करोति ।)

---

१. 'निदेश्य' इति क-पाठः. २. 'आर्य मद्वचनेनाक्रूरं' इति क-पाठः.
३. 'परिपालयिष्यामि' इति क-पाठः. ४. 'योज्यानि' इति ख-पाठः.

(ततः प्रविशति कृष्णः सुदामा च ।)

कृष्णः—सखे,

निजजनविरहव्यथा यथास्माननुकलमुत्तपति प्रंतिप्रतीकम् ।
अपि सखिसुहृदस्तथा कथंचित्स्मरयति नः कुतुकप्रसङ्गतोऽपि ॥ २३ ॥

सुदामा—आयुष्मन्, त्वदेकजीवितानां त्वन्मात्रदेवतानां च कथमित्थमपि संभाव्यते । अथवा कथं न सरिष्यन्ति यदि जातिस्मरा भविष्यन्ति ।

कृष्णः—कुत एतत् ।

सुदामा—

आबालवृद्धवनितं पशुपक्षिवृक्ष-
गुल्मोलपप्रभृतयः किल गोकुलस्थाः ।
त्वद्विप्रयोगजनितार्तिकुकूलवह्ना-
वापाकपाकपरिपाकमिवोद्वहन्ति ॥ २४ ॥

किं बहुना ।

प्रहीणप्राणेव प्रमुषितनिधानेव तमसि
प्रविष्टेव प्रत्यस्तमितरविचन्द्रद्युतिरिव ।
दवाग्नौ मग्नेवाचिरविरहखिन्नेव विषमा-[2]
मवस्थां प्रस्थानप्रभृति भवतो नन्दवसतिः ॥ २५ ॥

(प्रविश्यापटीक्षेपेण ।)

दूती—(ससंरम्भम् ।) भगवन्भुवनभागधेय,

अनन्यशरणामेतां त्वदेकायत्तजीविताम् ।
विरहार्ति[3]वलद्बाधां राधां कथमुपेक्षसे ॥ २६ ॥

---

१. प्रत्यङ्गम्. २. 'मग्नेवाशनिविनिहतेवेति' इति क-पाठः. ३. 'चलद्बाधां' इति क-पाठः.

कृष्णः—(ससंभ्रमं परिवृत्य ।) कथमियं राधासहचरी विलासवती विवशहृदयेवात्याहितमिवावेदयति प्रेयस्याः । तन्निपुणमवगच्छामि तावत् । (प्रकाशम् ।) विलासवति, [1]अथ किमवस्था तत्रभवती मज्जीविताधिदेवता राधा ।

विलासवती—

सजलैर्नलिनीदलैर्मृणालैः सुमनोभिर्नवपल्लवैः पटीरैः ।
शतशः परिशीलितापि शीतैरुपचारैः प्रतिबुध्यते न राधा ॥३७॥

अपि च ।

अपि मरणमुपैति सा मृगाङ्के विलसति कैव कथा रसान्तरस्य ।
अपि कथमधुना दधातु शान्तिं विषमशरज्वरतीव्रदेहदाहः ॥३८॥

कृष्णः—(सुदामानं प्रति ।) सखे, किमाह विलासवती ।

सुदामा—आयुष्मन्, [2]कथमसंभावना बहुधानुभूतस्वभावायामस्यां च विश्रम्भणीयवचनायाम् ।

विलासवती—न खल्वन्यथा कथयामि । यत इदानीं त्वयि प्रस्थिते—

माला व्यालानुकारा परिमलबहुलस्निग्धचम्पा नु शम्पा
पम्पाकम्पानिलोऽस्या मलयजनिलयाशीविषोद्गारघोरः ।
न स्यादस्या विभाव्यज्वरमिह [3]कृतमस्योत्थकम्पानुकम्पा-
झम्पासंपातजाग्रत्तुहिनकरहरिप्रोद्गमोत्त्रासभाजः ॥ ३९ ॥

कृष्णः—सत्यम् । संभावितमेतत् । सा किल—

---

१. 'कथय किमवस्था' इति **ख**-पाठः. २. 'कथमियं भावना' इति **ख**-पाठः. ३. 'कृतरस्य' इति **ख**-पाठः. ४. 'तुहिनकरकर' इति **क**-पाठः.

मां विना न क्षणं प्राणान्क्षामाङ्गी रक्षितुं क्षमा ।
न चन्द्रेण विना चान्द्री प्रभा भवितुमर्हति ॥ ४० ॥

(सुदामानं प्रति । सनिःश्वासम् ।) सखे, अपि प्रयाणावसरे संभ्रमातिवेगेन गृहाद्बहिर्निर्गच्छता मया न साधु संबोधिता प्रेयसीति परितप्यते मे हृदयम् । तथा हि—

श्रुत्वा यान्तं कथमपि रहो लब्धुमुत्कण्ठमाना
यावद्यावत्किमपि गदितुं मां पुरः स्थातुमैच्छत् ।
यावत्तावन्नयनसलिलं संभृतं संवरीतुं
यातायातैरहह दयिता केवलं वञ्चितैव ॥ ४१ ॥

अपि च ।

एकेनालोकयन्ती सभयमुभयतो ज्येष्ठदृष्टिप्रचारं
शून्येनानुव्रजन्ती प्रियमतिऋजुना लोचनेनापरेण ।
बाला कालातिपाताकलनविरचितानल्पसंकल्पदुःस्था
चित्रन्यस्तेव तस्थौ मयि निहितमना लोचनागोचरेऽपि ॥ ४२ ॥

(लोचने निमील्य चिरं [1]ध्यात्वा सोत्कण्ठम् ।)

सान्द्रसान्द्र[2]पुलकाङ्कुरपालीदन्तुरान्तुरभुजान्तरगूढः ।
कान्तया पुनरहं चिरचिन्तातान्तया बत कदा [3]परिरभ्ये ॥ ४३ ॥

(उच्चैर्निःश्वस्य ।) हंहो दैवहतक, कथं वञ्चितोऽस्मि ।

सा बिम्बाधरमाधुरी निरवधिः सा केलिकोपाकुला
वाचः काचन चातुरी परिचितोदञ्चद्विपञ्ची च या ।
किं च व्यञ्जितपञ्चबाणविजयास्ताः सालसा दृष्टयो
भूयो गोचरतां व्रजन्त्यपि विधे तस्याः कुरङ्गीदृशः ॥ ४४ ॥

---

१. 'परिभाव्य' इति क-पाठः. २. 'पुलकान्तर' इति ख-पाठः. ३. 'परिरप्स्ये' इति ख-पाठः.

सुदामा—शान्तं पापम् । कथमनाश्वासः । नन्वचिरादेव तत्रभवान्समीहितभाजनं भविष्यति ।

कृष्णः—हन्त भोः,

मद्वियोगंकृताबाधा राधा नोपेक्षितुं क्षमा ।
अनतिक्रमणीयं च मातुलस्योपसर्पणम् ॥ ४५ ॥

तत्किमत्र प्रतिपद्यताम् ।

सुदामा—(चिरं विचिन्त्य । प्रकाशम् ।) आयुष्मन्, उभयमप्यविरोधेन समाधीयताम् ।

कृष्णः—(सादरम् ।) कथमिव ।

सुदामा—तदाकर्ण्यतामवधानेन । अस्ति किल नातिदूरेऽधितरणितनयातीरपरिसरनिरस्तसमस्तोपसर्गमपास्तकलिकालकलुषमवधीरित[2]विविधाधिबाधमगाधगुणगरिमसंभारगम्भीरं विश्वविश्वंभराभोगभूषणीभूतप्रभूतवैभवं दरदलितललितकमलकुलगलदमन्दमकरन्दगन्धबन्धुरपरागधारान्धीकृतपुष्पंधयधोरणीदोधूयमानमाधवीलतावनद्धं विविधतरुकुसुमकल्हारमधुरमधुपानमत्तमधुकरीकलरवमुखरीकृतदिगन्तरं मन्दानिलधूतनूतनचूतमञ्जरीनरीनृत्यमानपिकसुन्दरीसहस्रकलकलाकुलिततरुणतरुशिखरं तरणितनयोत्तुङ्गरिङ्गत्तरङ्गप्रसङ्गसंगतानङ्गरङ्गकूलकूजद्विहंगपुंगवद्वन्द्वानुभूयमानकल्लोलदोलाखेलनकुतूहलमैति[3]चपलगोपालबालिकाकलितकरतालिकातरलवलयावलीकलकनकिङ्किणीचरणमणिनूपुरक्वणितवेणुवीणा[4]रवानुगतमृदुमृदङ्गध्वनिजनितहर्षप्रकर्षप्रकटिताकाण्डताण्डवाडम्बरोद्दण्डशिखण्डिमण्डलीमण्डितस्थण्डिलमतिविशदशशधरविस्र-

---

१. 'कृतां बाधां' इति ख-पाठः. २. 'अवधूत' इति क-पाठः. ३. 'अतिचलद्गोपाल' इति ख-पाठः. ४. 'वीणानकानुगत' इति क-पाठः.

मरकरनिकरचारुक्षीरधाराधोरणीधौतधरणिमण्डलमसमशरशरनिकरपरवशीकृतसुरनरमृगखगप्रमुखजीवजातसमुपजातशान्तमदनमहीपतिक्रीडावनं वृन्दावनं नाम ।

कृष्णः—(स्मृतिमभिनीय ।) अये, साधु स्मारितोऽसि । परिशीलितपूर्वमेतदस्माभिः । यत्किल—

वाचालैः शुककेकिकोकिलकुलैरारब्धकोलाहलं
वातान्दोलनलोलपल्लवलतालावण्यलीलागृहम् ।
उन्मीलन्मकरन्दतुन्दिलदलद्वासन्तिकासुन्दरं
शश्वन्मामकमत्तचित्तकरिणः संरोधसंदानकम् ॥ ४६ ॥

अपि च ।

अतिचित्रैः सुमनोभिः सुमनोभिर्योगिनामिवोपचितम् ।
शीलितमगमैरगमैर्निगमैरिव योगमारूढैः ॥ ४७ ॥

सुदामा—एवमेतत् । तदत्रैव राकानिशाकरकरनिकरकरम्बिताशेषदिक्चक्रवाले परमोदाररमणीये समये तरणितनयातटोपशोभिवंशीवटोपान्तवेदिकाविहारमण्डलीमण्डनीभूय निभृतनिभृतमधरसुधापूरितमधुरसुरलीरवाहूतनूतनाभिसारिकासहस्रसविभ्रमारब्धसरभसपरीरम्भसंभ्रमो विरहविधुरामीरकामिनीसमाजमावर्जयन्नतिविततबाधां राधामप्याराधयत्वायुष्मान् । इत्थमनुभावितरासरसातिरेकपरम्परापचेलिमनिर्भरानन्दाद्वयविस्मृतरसान्तरमपरिचितोचितानुचितविचारचातुरीचमत्कारमपलपितपरापरादरगौरवव्यवहारं तिरोहितबहिरुपाधिसंस्कारं रासक्रीडामहोत्सवं निर्वर्त्य, निवर्त्य च सकलसुन्दरीसमाजं प्रभातायां रजन्यां राजधानीमनुसरिष्यामः ।

---

१. 'इत्थमनुभवति' इति ख-पाठः. २. 'विस्मृतपदम्' इति ख-पाठः. ३. 'व्यवहारतिरोहित' इति ख-पाठः.

कृष्णः—साधु पर्यालोचितम् । तद्विसर्जयैनां राधासमाराधनाय । उपाहरतु चैनां संदेशसंग्रहकारिकाम्—

त्वत्संकल्पप्रणयि हृदयं पञ्चभिः पञ्चबाणो
बाणैरेणीचपलनयने पञ्चतां नेतुमैच्छत् ।
कालक्षेपं यदयमदयोऽप्यद्य यावद्विधत्ते
तत्कर्तव्यापंकृतिविपरीतार्थताशङ्कयैव ॥ ४८ ॥

सुदामा—विलासवति,

अलमिह तवोपचारैः प्रत्युतसंतापसंततिनिदानैः ।
अयमचिरादपनेष्यति भगवानस्या रसेन संतापम् ॥ ४९ ॥

निभृतं च कर्णे कथय—यदद्य रासरसोत्सवाय मुरलीरवमाकर्ण्य तूर्णमेव[2] वंशीवटविहारभूमावुपस्थातव्यमिति ।

कृष्णः—अथवा सर्व एव गोकुलवासिनः समायातनीयाः । उचितं च प्रथमनिवसतौ सुहृदां प्रस्थितानुव्रजनम् ।

विलासवती—यदादिशति देवः । (इति निष्क्रान्ता ।)

कृष्णः—सखे, अक्रूरमुपसृत्य विज्ञापय—भगवन्, अतिकठोर-किरणस्तपति तपनः । तन्नातिदूरे वृन्दावनोपवनेऽद्य विश्रम्य श्वोभूते मातुलालयमुपसरिष्यामः । उदाहरन्ति च जरन्तः—

'प्रथमा वसतिः स्वल्पसंचारा चेत्सुखावहा ।
यदस्यां पीतमशितं तत्सर्वत्रोपतिष्ठते' ॥ ५० ॥

वृन्दावनदिदृक्षा चास्मानुत्तेजयति निशि निवस्तुम् । तदद्य पुरःसरी-भूय राज्ञेऽस्मदागमनमावेदयत्वार्यः । यावदेनमस्मदागमनोत्कण्ठा नोत्तरलयति ।

---

१. 'अपहृति' इति ख-पाठः. २. 'षट्कर्णमेव' इति क-पाठः.

अक्रूरः—(सुदामोक्तमाकर्ण्य ।) यथाभिलषितमायुष्मते । (इति निष्क्रान्तः ।)

कृष्णः—(प्राचीमवलोक्य ।) कथमुपनत एव सायंतनः समयः । तथा हि—

कासारे कलहायिता इव मिथः सद्यः परांगानना[1]ः
स्वैरं चक्रचकोरपद्मकुमुदव्राताश्चिरादासते ।
प्रत्यक्सिन्धुनिमज्जदुष्णकिरणालातोत्थधूमैरिव
प्रध्मातोदरमेतदम्बरमितो ध्वान्तैः पराभूयते ॥ ५१ ॥

सुदामा—आयुष्मन्, एवमेतत् ।

प्राचीं कैरविणीगणाः परिणमच्छीतांशुगर्भामिव
स्वैरं सेरमुखाः पुरः[2] प्रसविनीं व्याख्यान्ति भृङ्गारवैः ।
किं चोदञ्चितचञ्चु चन्द्रमभितो मार्जन्ति जिह्वाग्रलैः
सद्यः स्यूत[3]जरायुवत्करकणव्रातं चकोराङ्गनाः ॥ ५२ ॥

कृष्णः—तदिदमनर्थान्तरम् । तथा हि—

एष प्रोषितभर्तृकाकुलमिलल्लाणप्रयाणे पुरः
प्रत्यूहप्रतिघातपूर्णकलशश्चन्द्रः समुज्जृम्भते ।
तत्कालप्रतिबुद्धकैरववनीसंभ्रान्तभृङ्गाङ्गना-
भेरीभँ[4]ूरिरवाः स्फुरन्ति मदनप्रस्थानसौवस्तिकाः ॥५३॥

अपि च ।

विशदकरवस्रानद्धगोत्राद्रिकीलं
शिबिरपटकुटीरं चान्द्रमुच्चैर्वितत्य ।

---

१. पराङ्मुखा इत्यर्थः. २. 'सुखप्रसविनीं' इति ख-पाठः. ३. 'सूत' इति ख-पाठः. ४. 'भृङ्गरवाः' इति ख-पाठः.

रतिपतिरतिरोषात्तारकापुष्पबाणै-
स्तुदति युवमनांसि ध्वान्तदन्तावलाढ्यः ॥ ५४ ॥
तदेहि । शशधरकरनिकरपरितप्यमानमात्मानं वृन्दावनतरुतिरस्करिणीनिरस्तचन्द्रिकासंपर्कं परित्रास्यामहे ।

सुदामा—यथाभिरुचितमायुष्मते ।

(इति वृन्दावनप्रवेशं नाटयन्ति ।)

इति चतुर्थोऽङ्कः ।

पञ्चमोऽङ्कः ।

(ततः प्रविशति सुनन्दनामा गोपालः ।)

सुनन्दः—आदिष्टोऽस्मि तत्रभवता घोषवृद्धेन नन्दगोपेन, यत्किलाक्रूरागमनगौरवेण रणरणकोपजातदाक्षिण्यसाध्वसावेशविवशतयाविमृश्यकारिणा रामकृष्णौ प्रस्थापयता मया नोदर्कशुद्धमालोचितमिति परितप्यते मे चेतः । यतः—

क्रूराशये कुटिलनीतिनिविष्टबुद्धौ[1]
वैरानुबन्धपरिशङ्कितचित्तवृत्तौ ।
व्रीडाविवेकविधुरे मधुरे हितेऽपि
कंसे न विश्वसिति मे हृदयं नृशंसे ॥१॥

तद्यावदेनं नानाविधोपायनपाणिभिर्घोषवासिभिः सबालदारैः शिथिलीकृतानुशयं करोमि, तावद्वत्साभ्यां वृन्दावनविहारकौतुकव्याजेन कियच्चिरं विलम्ब्यास्मदनुयाताभ्यां महाराजो द्रष्टव्य इति[2] । तदनुसरामि तावत् । केदानीं रामकृष्णौ द्रक्ष्यामि । (इति परिक्रम्यावलोक्य च ।)

---

१. 'निविष्टतुष्टौ' इति ख-पाठः. २. 'तावद्वत्साभ्यां महाराजो न द्रष्टव्यः' इति क-पाठः.

अये, कथमयं सुदामा तयोः सहचर इत एवाभिवर्तते । तदस्मात्प्रवृत्तिमुपलप्स्ये । (प्रविश्य ।) सुदामन्, क्व प्रस्थितोऽसि ।

सुदामा—

'रासोत्सवपरिश्रान्तं कान्ताजनकदम्बकम् ।
निवेश्य गोकुले पित्रोः प्रवृत्तिं समुपाहर' ॥ २ ॥

इति प्रेषितोऽस्मि तत्रभवद्भ्यामार्याभ्याम् ।

सुनन्दः—तदलं गोकुलगमनावेशेन ।

सुदामा—कथमिव ।

सुनन्दः—निर्जनमिदानीं गोकुलम् ।

सुदामा—(ससाध्वसम् ।) स्पष्टं तावत्कथय ।

सुनन्दः—किं न श्रुतवानसि । प्रस्थितयो रामकृष्णयोरनु तन्मानसो नन्दगोपः सुहृद्भिः सह संमन्त्र्य विशदचन्द्रचन्द्रिकाधवलायां रजन्यां ससुहृत्समाजः शकटाधिरोपितविविधोपढौकनिकसहस्रसनाथीकृतगोधनगोपगोपीप्रधानं शिबिरं वृन्दावनराजधान्योरन्तराले निवेशितवान् । स्वयं चेदानीं राजकरमुपाहर्तुं नगरमुपागतः ।

सुदामा—कथय तावत्, किमस्याकूतम् ।

सुनन्दः—किं कथ्यताम् । ननु तेनैव व्यक्तमुक्तम्—('क्रूराशये' इत्यादि पठति ।)

सुदामा—यद्येवं तत्किमिव तत्प्रतिविहितं[1] मन्यते गोपवृद्धः ।

सुनन्दः—बाढमयं हि तस्याशयः ।

साम्ना दानेन भेदेन चेदयं नोपशाम्यति ।
ततः पुरःसरीभूय नियोत्स्ये वत्सयोरहम् ॥ ३ ॥

---

१. 'तावत्प्रतिविहितं' इति क-पाठः.

सुदामा—उचितमेवैतत्पुत्रिणां पुत्रवात्सल्यस्य ।

यदपरविषयेभ्यः प्रीतिपात्रं स्वगात्रं
गुरुतरमसुतोऽपि प्राणिनां [1]प्राणमात्रम् ।
प्रियतममिह तस्मादप्यपत्यं न कृत्यं
परमिह [2]मनुजानामस्त्यतः पुत्रलाभात् ॥ ४ ॥

किं तु ।

अनपेक्षितात्मशक्तिप्रतिपक्षे रक्षसां पक्षे ।
व्यवसितमिदमेतस्य क्षेमाय न किं तु चित्तखेदाय ॥ ५ ॥

सुनन्दः—आः, कथमेवमुच्यते । यतः—

को वेद दैवचरितं येन ब्रह्माण्डकोट्यः सृष्टाः ।
निमिषार्धेन क्षपिता दशाननब्रह्मरुद्रेन्द्राः ॥ ६ ॥

सुदामा—अलमिदानीमुक्तिप्रत्युक्तिभिः कालातिपातेन शिबिरसंनिवेश एव स्त्रैणं निवेश्य रामकृष्णावनुसरामि ।

सुनन्दः—क्व पुनरिदानीमिमौ द्रष्टव्यौ । यदहमपि नन्दगोपस्य निदेशादेतौ सहसा राजधानीप्रवेशाद्विरमयितुं त्वरया प्रस्थितोऽस्मि ।

सुदामा—(विहस्य ।) रे [3]मुग्धाशयोऽसि ।

यन्मातुलालयविलोकनकौतुकेन
प्रातस्तरामनुगतौ स्ववयोभिरेतौ ।
संप्रस्थितौ किल कलिन्दसुतातितुङ्ग-
रिङ्गत्तरङ्गसुभगेन पथा विहर्तुम् ॥ ७ ॥

सुनन्दः—(सविषादम् ।) अहह, कथमविमृश्यकारितया नन्दादेशप्रतीपमेवाचरितमाभ्याम् । हन्त भोः,

---

१. 'तत्कलत्रम्' इति ख-पाठः. २. 'ननु जाने नास्त्यतः' इति क-पाठः.
३. मुग्धाशय 'मुग्धाशयोऽसि' इति ख-पाठः.

न तादृशः कोऽपि सखा न वृद्धो न गोपिता नापि पिता न माता ।
बाल्यादिमौ यच्चपलौ निरुध्यात्तदत्र दैवं शरणं प्रतीमः ॥ ८ ॥
(प्रकाशम् ।) तदागच्छ । आवामपि तपनतनयातीरपरिसरविहरणशीलावेतावनुसरावः ।

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

(ततः प्रविशतो रामकृष्णौ ।)

रामः—अहो रमयतितरां प्राभातिकी तरणितनयातीरशोभा अचिरोषिताभिर्वर्षाभिः कृतोपद्रवापि पुनः प्रकृतिमापन्ना । तथा हि—

भग्नास्तीरमहीरुहः सहचराः प्रोत्सारिताः पक्षिणः
कालुष्यं हृदये कृतं सहभुवस्त्यक्ताः प्रसादादयः ।
स्रोतोभिर्जलदप्रमुक्तसलिलैरासाद्य वृद्धिं क्षणा-
त्किं किं नापकृतं बलाद्विकुरुते लक्ष्मीमदः क्षुद्रकान् ॥ ९ ॥

कृष्णः—एवमेतत् । संप्रति तु सुविहितं शरदा । तथा हि—

व्योमापव्वस्तमेघावरणमपसरत्पङ्कशङ्काकलङ्कः
पन्था निस्तन्द्रचन्द्रा रजनिरपि सरिद्राजहंसावतंसा ।
फुल्लद्राजीवराजीबहलपरिमलोद्गारधीरः समीरः
क्ष्मापालांश्चित्तवृत्तिश्चपलयति चिराज्जैत्रयात्रोत्सवाय[1] ॥ १० ॥

रामः—(पुरो निरूप्य सहर्षम् ।)

कालिन्दी मन्दमन्दानिलचलदमलालोलकल्लोलमाला-
दोलास्वेलन्मरालैरविरलकमलालंकृतेवावभाति ।
मज्जन्मातङ्गगण्डस्थलगलितमदामोदलोभाद्भ्रमद्भि-
र्भृङ्गैर्नीरन्ध्रितोर्ध्वं कुवलयवलया द्वैतमाविष्करोति ॥ ११ ॥

---

१. 'यात्रोद्यमाय' इति ख-पाठः.

कृष्णः—(स्पर्शसुखमभिनीय सहर्षम् ।)

एते पाटीरवाटीनवविटपनटीलास्यशिक्षातिदक्षा
दोलाखेलत्पुरंध्रीश्रमजलकणिकाजालपानातिपीनाः ।
सौरभ्यादापतद्भिर्मधुकरपटलैः पृष्ठतोऽनुप्रयाताः
कामाग्नेर्वान्ति [1]धाय्याः पथिककुलवधूबद्धवैराः समीराः ॥१२॥

रामः—आयुष्मन्, कथं विविधकलाकलनकौतुकाक्रान्तचित्तत-यानधिगताध्वसंचारखेदा न चिरादेव राजधानीमुपगताः स्मः ।

तथा हि—

उपवनतरुखण्डहिण्डमानाण्डजकुलकाकलिकाकुलीकृताशाः ।
परिनदितशिखण्डमण्डलीका ददति सुखं मथुरोपशल्यदेशाः ॥१३॥

अपि च ।

वाताधूतमधूकपूगनिवहैर्जम्बीरजम्बूचयै-
र्वन्यैश्चापि कदम्बनिम्बकुटजैः कम्भारिरम्भाभरैः ।
यद्वाटी वटपर्कटीचलदलश्रीदाडिमश्रीफलैः
खर्जूरीपनसादिभिर्विजयते नारङ्गरङ्गस्थली ॥ १४ ॥

(पुनः साश्चर्यम् ।)

माकन्दा मकरन्दविन्दुनिवहैरानन्दितेन्दिन्दिराः
किं वामन्दमरन्दकुन्दनिचया मन्दानिलान्दोलिताः ।
सौराज्येऽप्यधुना भवन्ति न यदा ते वाटपाटच्चराः
पान्थानां किमतःपरं परिचितास्ते चम्पकाकम्पकाः ॥ १५ ॥

---

१. अग्निसमिन्धनकृत्.

(नेपथ्ये कलकलः ।)

(उभौ ससंभ्रममाकर्णयतः ।)

(पुनर्नेपथ्ये ।)

*हद्धि हद्धि । अणिसोम्हि दाणिं संवुत्तो । अअं जणो पसुमारं मारिज्जइ । ता पलित्ताअध महाणुभाआ ।

उभौ—आः, कोऽयमन्यैः परिबाध्यमानोऽशरणोऽस्मासु पूत्करोति ।

(प्रविश्य संभ्रान्तः पुरुषः ।)

पुरुषः—आयुष्मन्तौ, युष्मत्पादपद्मोपजीवी कुब्जको नाम रामानुचरः ।

उभौ—अथ किं तस्य ।

पुरुषः—स राज्ञश्चैलनिर्णेजकेन व्यापाद्यमानो मयानुनीय कथं कथमप्यनुमोचितो नाद्यापि प्रत्यवस्थानाद्विरमति ।

कृष्णः—तदागच्छ तावत् । प्रत्यनन्तरीभूय तस्यापराधकारणं निभृतमवगच्छामः ।

(इति नेपथ्यान्तरितौ तिष्ठतः ।)

(ततः प्रविशति कुब्जको रजकश्च ।)

कुब्जकः—†अले अले लज्जआ, देहि अम्हाणं सामिणं लाअपुलप्पवेशजोग्गाइं वशणाइं निवशिदुम् ।

रजकः—‡अले दासीए पुत्तआ, को तुमं, के उण तुझ सामीओ ।

---

* हा धिक् हा धिक् । अनीशोऽस्मीदानीं संवृत्तः । अयं जनः पशुमारं मार्यते । तत्परित्त्रायेथां महानुभावौ ।

† अरे अरे रजककक, देह्यस्माकं स्वामिनो राजपुरप्रवेशयोग्यानि वसनानि निवसितुम् ।

‡ अरे दास्याः पुत्रक, कस्त्वम् । कौ पुनस्तव स्वामिनौ ।

कुब्जकः—*हग्गे णन्दगोअकुमालाणं लामकण्हाणं पलिचालए चेलधाअए ।

रजकः—(सरोषम् ।)† अरे दुव्विणीदआ, सच्चं गामेलो सि । ण होसि णाअरिओ । ता लहु णिहुअं गच्छ, जाव एदे राआणुअरा तुमं ण पेक्खन्ति ।

कुब्जकः—‡पेक्खिअ किं करिस्सन्ति ।

रजकः—§जइ दे ईरिसं वअणं सुणिसन्ति, ता तुमं ण होसि ।

कुब्जकः—¶कीस कालणादो ।

रजकः—$अणुइदं खु जप्पसित्ति ।

कुब्जकः—‖किं एत्थ अणुइदं भणिदम् । णं माणुसा एव्व अंसुआइं णिवसन्ति ण उण पसुआ ।

रजकः—(साधिक्षेपम् ।) ⁂अरे, सुणस । राइणो खु एदाइं अंसुआइं ण जुज्जन्ति गामेलाणं णिवसिदुम् ।

---

* अहं नन्दगोपकुमारयो रामकृष्णयोः परिचारकश्चेलधावकः ।

† अरे दुर्विनीतक, सत्यं ग्रामीणोऽसि । न भवसि नागरिकः । तल्लघु निभृतं गच्छ, यावदेते राजानुचरास्त्वां न पश्यन्ति ।

‡ प्रेक्ष्य किं करिष्यन्ति ।

§ यदि ते ईदृशं वचनं श्रोष्यन्ति, तत् त्वं न भविष्यसि ।

¶ कस्मात्कारणात् ।

$ अनुचितं खलु जल्पसीति ।

‖ किमत्रानुचितं भणितम् । ननु मानुषा एवांशुकानि निवसन्ति न पुनः पशवः ।

⁂ अरे, शृणुष्व । राज्ञः खल्वेतान्यंशुकानि न युज्यन्ते ग्रामीणानां निवसितुम् ।

कुब्जकः—*णं भणामि जइ अहं ण जोग्गो ता किं अम्हाणं सामीणं पि ण जुज्जन्ति ।

रजकः—†अरे, ण एत्थ तुमं अवरज्झसि । किं उण तुह सामीओ जेव्व, जेहिं तुमं इमस्सिं दुल्लहब्भत्थणे कम्मम्मि अणुप्पेसिदो ।

कुब्जकः—(सरोषम् ।) ‡कहं ले, इमस्सिं बह्मण्डमण्डले किं अत्थि जं अम्हाणं पहूणं ण सुलहम् । पेक्ख दाव—

जेहिं सो सअडासुरो विदलिओ जेहिं हदा पूअणा
जेहिं जेव्व सिलाअले विणिहदो तिह्मो तिणावत्तओ ।
जेहिं धेणुअकेसिकालिअबआरिट्ठा गरिट्ठा हदा
हन्तव्वा अवरे दइच्चनिवहा ते जेव्व पत्ता इमे ॥ १६ ॥

रजकः—(स्मृतिमभिनीय सरोषम् ।) §अरेरे पांसुलापुत्त, कहं इत्थं विअत्थणेण कदत्थेसि सामीणं पुलिसत्थम्, जाणं सत्त भाअरा सिलापट्टेसु अम्हकेरेहिं किंकरेहिं उप्पाडिआ । तत्थ भअसङ्किदेहिं

---

* ननु भणामि यद्यहं न योग्यस्तत्किमस्माकं स्वामिनोरपि न युज्यन्ते ।

† अरे नात्र त्वमपराध्यसि । किं पुनस्तव स्वामिनावेव, याभ्यां त्वमस्मिन्दुर्लभाभ्यर्थने कर्मण्यनुप्रेषितः ।

‡ कथं रे, अस्मिन्ब्रह्माण्डमण्डले किं तदस्ति यदस्माकं प्रभ्वोर्न सुलभम् । पश्य तावत्—

याभ्यां स शकटासुरो विदलितो याभ्यां हता पूतना
याभ्यामेव शिलातले विनिहतस्तीक्ष्णस्तृणावर्तकः ।
याभ्यां धेनुककेशिकालियबकारिष्टा गरिष्ठा हता
हन्तव्या अपरे दैत्यनिवहास्तावेव प्राप्ताविमौ ॥

§ अरेरे पांसुलापुत्र, कथमित्थं विकत्थनेन कदर्थयसि स्वामिनोः पुरुषार्थम्, ययोः सप्त भ्रातरः शिलापट्टेष्वस्मदीयैः किंकरैरुत्पोथिताः । तत्र

एदेहिं माअरं पिअरं अ उवेक्खिअ नन्दपल्लीं पलाइअ णिलीअट्ठिदम् । लगुडहत्थकम्बलणिवसणादिहिं नट्ठचरिदेहिं दिणाइं अइवाहीअन्ति । तद्वलाहेण जेव्व ताणं मादरपिअरा अम्हाणं रण्णा खसिअ काराघरम्मि णिअडबन्धणे णिजुत्ता । एदं सव्वं सुणिअ सहन्ता वि जीअन्ति । ण उण हिअअं उव्भिणिअ जीइअं परिच्चअन्ति । दाणिं उण महाराएण दे वि खेत्तपालबलिं कादुं इह जेव्व आणीदा त्ति सुणीअदि ।

रामः—कृष्ण, किमतःपरमपि श्रोतव्यम् । यदीदृशा अप्यघिक्षिपन्ति ।

कृष्णः—आर्य,

मदकलकरिकुम्भोद्भेदनव्यग्रबुद्धिं
व्यथयति न मृगेन्द्रं फेत्कृतं फेरवस्य ।
तरलयति भवन्तं हा कथं रोष एष
प्रलयदहनकल्पस्तावकः कक्षदाहे ॥ १७ ॥

रामः—आयुष्मन्, प्राप्तावसरमेतन्नोपेक्षितुं क्षमम् ।

आगर्भसंभवदिनं परिरक्षितस्य
कंसापराधशतकैश्चिरसंभृतस्य ।

भयशङ्किताभ्यामेताभ्यां मातरं पितरं चोपेक्ष्य नन्दपल्ल्यां पलाय्य निलीयस्थितम् । लगुडहस्तकम्बलनिवसनादिभिर्नष्टचरितैर्दिनान्यतिवाह्यन्ते । तद्पराधेनैव तयोर्मातापितरावस्माकं राज्ञा रुषित्वा कारागृहे निगडबन्धने नियुक्तौ । एतत्सर्वं श्रुत्वा सहमानावपि जीवतः । न पुनर्हृदयमुद्भिद्य जीवितं परित्यजतः । इदानीं पुनर्महाराजेन तावपि क्षेत्रपालबलिं कर्तुमिहैवानीताविति श्रूयते ।

क्रोधाभिधस्य दितिजक्षयकालवह्नेः
संदीपनाय रजकः प्रथमाहुतिर्नः ॥ १८ ॥

कृष्णः—यथाभिरुचितमार्यस्य। (इति परिक्रम्योपसर्पति ।) रेरे रजक,

भागिनेयौ नृपस्यावां पुरीं यावो निमन्त्रितौ ।
देहि योग्यानि वासांसि श्रेयस्तत्ते भविष्यति ॥ १९ ॥

रजकः—(सोपहासं संस्कृतमाश्रित्य ।)

ईदंस्येव वनेचरा निवसते वासांसि वां पूर्वजा-
स्तद्योग्यानि तु दुर्लभान्यविकुलेष्वन्विष्यमाणान्यपि ।
येन प्राघुणिकीकृतौ नरपतिः सोऽद्यैव वां दास्यति
त्यक्त्वा बालिशतां निलीय निभृतं कंचित्क्षणं जीवतम् ॥ २० ॥

कृष्णः—(किंचित्स्मित्वा ।) कुब्जक, किमद्यापि विलम्बसे । उत्पो-
थ्यतामेष दुर्मुखोऽस्मिन्नेव शिलातले ।

कुब्जकः—*जं महापहू आणवेदि । (इति परिकरं बद्ध्वा तथा करोति ।)

(नेपथ्ये कलकलः ।)

अब्बह्मण्णं अब्बह्मण्णम् ।

†अहह गहिअ पाये भूरि भम्मादिकाणं
पिठुलसिलत्तलम्मि प्पोथिदो पाडिऊण ।

---

* यन्महाप्रभुराज्ञापयति ।

† अन्नह्मण्यमन्नह्मण्यम् ।
अहह गृहीत्वा पादे भूरि भ्रामयित्वा
पृथुलशिलातले पोथितः पातयित्वा ।
क्षौमितदशादिगन्तः क्रन्दन्नतिमात्रं
नरपतिप्रियदासो जम्बुको रङ्गकारः ॥

---

१. 'अपि कुले' इति ख-पाठः.

खुहिददहदिअन्तो पुक्करन्तोऽतिमेत्तं
नरवइपिअकेरो जम्बुओ रङ्गआरो ॥ २१ ॥

रामः—
रे रे गोपा हतपरिजनान्वस्त्रकोषान्विमुच्य (?)
स्वैरं चीरोच्चयमतिमृदुं मुक्तशङ्कं वसीध्वम् ।
स्वेच्छोपात्तैः कुसुमवसनैर्भूषिता गन्धधूपै
रथ्यावीथ्या नगरमभितः संभ्रमेण भ्रमामः ॥ २२ ॥

(प्रविश्य ।)

पुरुषः—
कनकभुवि सुजातौ रत्नकिर्मीरिताभै-
निंरुतममलसूत्रैर्विश्वकर्मप्रणीतम् ।
[1]मदुपहृतममुष्मै भूभृते वस्त्रजातं
वसितुमिह भवन्तावर्हतस्तत्तु नान्यः ॥ २३ ॥

कृष्णः—साधु भोः, साधु ।
उचितज्ञोऽनुरक्तोऽसि भक्तोऽसि कुशलोऽप्यसि ।
कृतकृत्यो भवेदानीमैहिकामुष्मिकश्रिया ॥ २४ ॥

पुरुषः—गृहीतः प्रसादो मनोरथातीतः । अनुगृह्यन्तामिमानि दिव्यानि वसनानि ।

रामकृष्णौ—यथाभिलषितं भवते । (इति परिदधाते ।)

रामः—आयुष्मन्, अस्य दिव्यवस्त्ररचितस्य वेषस्यानुरूपेण दिव्य-गन्धानुलेपनेन भवितव्यम् ।

कृष्णः—आर्य, यात्रामुहूर्त एव सर्वसमीहितं संघटयिष्यति । (परिक्रम्य पुरतोऽवलोक्य ।) आर्य, कथमयमुपलब्धासदागमनवृत्तान्तः

---

१. 'यदुपहृत' इति क-पाठः.

सुदामा नाम मालाकारः प्रीतमनाः संभृतासत्पूजोचितसंभारोऽस्मदा-गमनायोत्कण्ठमान इत एवाभिवर्तते ।

(प्रविश्य ।)

सुदामा—भगवन्तौ, एष भृत्यापसदः सुदामा पादयोः पतति ।

रामकृष्णौ—समीहितभाजनं भूयाः । अये, कुशल्यसि ।

सुदामा—

जगतः कुशलायैव भवतोरयमुद्यमः ।
भक्तानुग्राहिणौ[1] दृष्ट्वा भवेयं कुशली न किम् ॥ २५ ॥

रामकृष्णौ—सुदामन्, राजानमनुचरन्नप्यसासु नित्यानुरक्तो भक्तश्च भवानिति श्रुतपूर्वमस्माभिः । तेन चातितरां त्वयि प्रीताः स्मः ।

सुदामा—यद्येवमिदमत्यासन्नं मदीयं भवनं क्षणं विश्रम्यानुगृह्यताम् ।

(श्रीकृष्णो राममुखमीक्षते ।)

रामः—को विरोधः । क्रियतामस्य समीहितम् ।

(इति प्रविशन्ति ।)

सुदामा—इदमासनमिदं पाद्यमिदमर्घ्यमेतानि चाचमनीयभक्ष्यभोज्यलेह्यपेयपानकताम्बूलगन्धकुसुमाम्बरादीन्यनुगृह्यन्ताम् । अपि च—

एतास्ता नवमल्लिकापरिमलप्राग्भारलोभभ्रम[2]-
भ्राम्यद्भृङ्गीभांकृतिमूरिपूरितहरित्प्रत्युच्चरत्सौरभाः ।
चञ्चच्चम्पकदामकोमलमिलत्सौदामनीसंपदः
सत्सौगन्धिकगन्धबन्धमधुराः श्रेयः सृजन्तु स्रजः ॥२६॥

रामकृष्णौ—(विहस्य ।) अये, महाराजपूजोपकरणान्येतानि । नार्हसि ग्रामीणेभ्यो वनेचरेभ्य उपहारीकर्तुम् ।

---

१. 'भक्तानुग्राहिणोर्दृष्ट्वा' इति क-पाठः. २. 'लोलभ्रम' इति ख-पाठः.

सुदामा—भगवन्तौ, नाहमविदिततत्त्वो रजकः । यो नाज्ञासीत्

भूमेर्भारावताराय चरन्तौ बाललीलया ।
अनादिनिधनौ पूर्णौं मूर्तिभेदमुपाश्रितौ ॥ २७ ॥

कृष्णः—(सोत्प्रासहासम् । करेण करं गृहीत्वा ।) तदेहि । (इति निष्क्रान्तः । पुरोऽवलोक्य साश्चर्यम् ।) सुदामन्,

राकाचन्द्रप्रतिमसुदितभ्रूलतालास्यमास्यं
वेणीं श्रेणीमिव मधुलिहामावहन्ती कुचाग्रे ।
पृष्ठोदञ्चद्गडुविनिहितग्रीवमुत्प्रेक्षमाणा
रथ्यावीथ्या कथय पुरतः केयमायाति वक्त्रम् ॥२८॥

सुदामा—उपनतप्रायैव सा, पृच्छ्यताम् । स्वयमेव वक्तव्यं वक्ष्यति ।

(प्रविश्य ।)

कुब्जा—(परिक्रम्य साकूतम् ।)

*रूअविणिज्जिदमारो णन्दकुआरो [अ] कुसुमसुउआरो ।
सुणिअदि गुज्जरिजारो सवणेहिं ण उण णअणेहिं ॥ २९ ॥
सो एत्थ आअदो त्ति ज्जणदि पउत्तिं सुणीअ अन्तउरे ।
उक्कण्ठिदम्हि दट्ठुं णाअरिआजीअसव्वस्सम् ॥ ३० ॥

ता कहिं दाणिं पेक्खिस्सम् (पुरोऽवलोक्य सहर्षम् ।) अम्महे,

---

*रूपविनिर्जितमारो नन्दकुमारः [च] कुसुमसुकुमारः ।
श्रूयते गुर्जरीजारः श्रवणाभ्यां न तु नयनाभ्याम् ॥
सोऽत्रागत इति झटिति प्रवृत्तिं श्रुत्वान्तःपुरे ।
उत्कण्ठितास्मि द्रष्टुं नागरिकाजीवसर्वस्वम् ॥
तत्कुत्रेदानीं प्रेक्षिष्ये । अम्महे,

---

१. गडुः कुब्जानां पृष्ठदेशस्थो मांसपिण्डः. २. 'व्यक्तं' इति क-पाठः.

एसो दीसइ पुण्डरीअणअणो णीलुप्पलस्सामलो
पाआलम्बिअकण्ठमालसुहओ पीअम्बराडम्बरो ।
गोरङ्गेण अ भाउणा अणुगदो णीलम्बरुब्भासिणा
गङ्गासोतसमागदो व्व जउणापूरो जसोदासुओ ॥ ३१ ॥

(इति चिरं विलोकयन्ती तिष्ठति ।)

कृष्णः—(उपसृत्य ।) अये,

कासि त्वं [1]कुत आयासि कस्य वासि परिग्रहः ।
किं वा कस्योपनयसि नयसिद्धिरिवेहिता ॥ ३२ ॥

कुब्जा—*सुणादु महाणुआहो । अहं खु तत्थभवदो महाराअ-कंसस्स अन्तेउरपरिचारिआ सेरन्धी तिवङ्कणी नाम । तस्स कए णं उअहरामि दिव्वङ्गराअक्खमं जक्खकद्दमखोदम् । जदो मए उवणीदं जेव्व कुसुमवसणाणुलेअणतम्बोल्लप्पहुदि तस्स रण्णो बहुमदं भोदि, ण उण अण्णेण ।

कृष्णः—(सोत्त्रासम् ।) उचितमेवैतत् ।

भवादृशी कापि किमसि सृष्टौ यया वशीभावमनायि राजा ।
न राजतुल्योऽस्ति जनो गुणज्ञो यस्त्वामहो कामयते त्रिवक्राम् ॥३३॥

एष दृश्यते पुण्डरीकनयनो नीलोत्पलश्यामलः
पादालम्बितकण्ठमालासुभगः पीताम्बराडम्बरः ।
गौराङ्गेण च भ्रात्रानुगतो नीलाम्बरोद्भासिना
गङ्गास्रोतःसमागत इव यमुनापूरो यशोदासुतः ॥

*शृणोतु महानुभावः । अहमस्मि तत्रभवतो महाराजकंसस्यान्तःपुर-परिचारिका सैरन्ध्री त्रिवक्रा नाम । तस्य कृते एनमुपहरामि दिव्याङ्गराग-क्षमं यक्षकर्दमक्षोदम् । यतो मयोपनीतमेव कुसुमवसनानुलेपनताम्बूलप्रभृति तस्य राज्ञो बहुमतं भवति, न पुनरन्येन ।

---

१. 'कुत्र वा यासि' इति क-पाठः ।

कुब्जा—*अलं उवहासेण ।

कृष्णः—नायमुपहासः । किं तु कथयामि—न खलु रसिकानामाकृतिष्वादरः, अपि तु गुणेषु । अथवा प्राग्भवीयसंस्काराहितः क्वचिद्देव कस्यचित्प्रेमातिशयो न गुणपरीक्षामपेक्षते । तथा हि—

यद्यपि दिशि दिशि बहवस्तरवः सन्त्येव कुसुमसंपन्नाः ।
तदपि च कोकिलयूनोऽनूनो रागो रसालमालायाम् ॥ २४ ॥

कुब्जा—†देवकअं मह आकिदीए वङ्कुणत्तणम् । तत्थ मए किं कादुं सक्कम् ।

सुदामा—यद्येवं तर्हि देवानामपि देवं भगवन्तं भजस्व । येन तवैहिकमामुष्मिकं च शुभं भवति ।

कुब्जा—(संस्कृतमाश्रित्य ।) किमद्याप्येतदुपदेष्टव्यम् । यतः ।

अनेकजन्मार्जितपुण्यपाकैः परं निधानं भगवन्तमाप्य ।
न जातु हातुं वलते मनो मे स्वर्गापवर्गादिषु वीतरागम् ॥ २५ ॥

‡ता पसीदतु भअवं । अणुगेह्णादु एदं दिव्वं जक्खकद्दमं अङ्गरागं इमाइं कुसुमतम्बोलादीइं ।

कृष्णः—अये, अतितीव्रप्रकृतिकोपनो नरपतिस्त्वयासासूपकल्पितमिदमाकर्ण्य त्वामसांश्च समूलघातं हनिष्यति ।

कुब्जा—भगवन्, अचिन्त्यानुभावं भवन्तमनुगतानां नास्ति कृतान्तादपि भयशङ्का, किं पुनरस्मान्मनुष्यकीटात् ।

रामः—आयुष्मन्, किमेवमतिवाह्यतेऽनुरक्तो लोकः । संपाद्यतां समीहितमस्याः ।

---

* अलमुपहासेन ।

† दैवकृतं ममाकृतेर्वक्रत्वम् । तत्र मया किं कर्तुं शक्यम् ।

‡ तत्प्रसीदतु भगवान् । अनुगृह्णात्वेतद्दिव्यं यक्षकर्दममङ्गरागमेतानि कुसुमताम्बूलादीनि ।

सुदामा—भगवन्, यद्यस्या गाढोऽनुरागबन्धस्तर्हि स्वहस्तेनैव युवयोरङ्गानुलेपनं करोतु । एवं हि वयं नापराधभाजनं भविष्यामः । इयं तु राज्ञोऽनुरोधविरोधौ विचिन्त्य [1]यथोचितमाचरतु । किं नस्तया चिन्तया ।

रामः—साधूत्प्रेक्षते सुदामा ।

कुब्जा—(विहस्य ।) *अम्महे, जह मे वङ्कुणी पिट्ठी एव्वं तुह वङ्कुणी बुद्धिः ।

सुदामा—(अपवार्य ।) अयि मुग्धे, एवं हि कृते प्रसन्नो भगवानेवालिङ्ग्य त्वामतिऋजुं करिष्यति ।

कुब्जा—(प्रकाशम् ।) †अणुमदो तुज्झ मन्तोपदेसो । (इति तथा करोति ।)

(नेपथ्ये ।)

‡अच्चरिअं अच्चरिअम् । अम्हहे,

एसा कंसस्स दासी कसणकसिलाहेमरेहाभदेहा
दीहा छीणङ्गलट्ठी थणभरणमिआ कण्णजाहच्छिलच्छी ।
दुल्लक्खा चन्दणच्चापविअरणकलामेत्तसंतोसिएणं
कह्वेणं ही तिवङ्का कह विअ णिमिसद्धेण उज्जू करिज्जा ॥३६॥

---

* अम्महे, यथा मम वक्रं पृष्ठमेवं तव वक्रा बुद्धिः ।

† अनुमतस्तव मन्त्रोपदेशः ।

‡ आश्चर्यमाश्चर्यम् । अम्महे,

एषा कंसस्य दासी कषणकषशिलाहेमरेखाभदेहा
दीर्घा क्षीणाङ्गयष्टिः स्तनभरनमिता कर्णमूलाक्षिलक्ष्मीः ।
दुर्लक्षा चन्दनार्चाप्रवितरणकलामात्रसंतोषितेन
कृष्णेन हि त्रिवक्रा कथमिव निमिषार्धेन ऋजुः कृता ॥

---

१. यथोचितं चरतु' इति क-पाठः.

सुदामा—भगवन्, यद्यस्या गाढोऽनुरागबन्धस्तर्हि स्वहस्तेनैव युवयोरङ्गानुलेपनं करोतु । एवं हि वयं नापराधभाजनं भविष्यामः । इयं तु राज्ञोऽनुरोधविरोधौ विचिन्त्य [1]यथोचितमाचरतु । किं नस्तया चिन्तया ।

रामः—साधूत्प्रेक्षते सुदामा ।

कुब्जा—(विहस्य ।) *अम्महे, जह मे वङ्कुणी पिट्ठी एव्वं तुह वङ्कुणी बुद्धिः ।

सुदामा—(अपवार्य ।) अयि मुग्धे, एवं हि कृते प्रसन्नो भगवानेवालिङ्ग्य त्वामतिऋजुं करिष्यति ।

कुब्जा—(प्रकाशम् ।) †अणुमदो तुज्झ मन्तोपदेसो । (इति तथा करोति ।)

(नेपथ्ये ।)

‡अच्चरिअं अच्चरिअम् । अम्हहे,

एसा कंसस्स दासी कसणकसिलाहेमरेहाभदेहा
दीहा छीणङ्गलट्ठी थणभरणमिआ कण्णजाहच्छिलच्छी ।
दुल्लक्खा चन्दणच्चापविअरणकलामेत्तसंतोसिएणं
कह्मेणं ही तिवङ्का कह विअ णिमिसद्धेण उज्जू करिज्जा ॥२६॥

---

* अम्महे, यथा मम वक्रं पृष्ठमेवं तव वक्रा बुद्धिः ।

† अनुमतस्तव मन्त्रोपदेशः ।

‡ आश्चर्यमाश्चर्यम् । अम्महे,

एषा कंसस्य दासी कषणकषशिलाहेमरेखाभदेहा
दीर्घा क्षीणाङ्गयष्टिः स्तनभरनमिता कर्णमूलाक्षिलक्ष्मीः ।
दुर्लक्षा चन्दनार्चाप्रवितरणकलामात्रसंतोषितेन
कृष्णेन हि त्रिवक्रा कथमिव निमिषार्धेन ऋजुः कृता ॥

---

१. यथोचितं चरतु' इति क-पाठः.

नप्रत्यासन्नप्रतोलीष्वापणिका नानाविधपण्योपायनपाणयोऽस्मदागमनाय त्वरमाणाः श्रेष्ठिश्रेष्ठपुरःसराः पुरः समुपसर्पन्ति । तदत्र वयमेवोपसृत्य रथ्याशोभां पश्यामः ।

रामः—एवमस्तु ।

(इति परिक्रामन्ति ।)

रामः—(रथ्याशोभां निर्वर्ण्य ।) अहो, महदाश्चर्यम् ।

चञ्चच्चन्दनसारसौरभभरभ्राम्यद्भिरेफावली-
व्यालीढान्घनसारपूरनिकरान्कस्तूरिकाविभ्रमान् ।
क्रीणन्त्यापणिकास्तथा मधुकरव्रातैः सहोत्तोलिता-
न्कस्तूरीप्रकरान्विविच्य सुचिराज्जानन्ति गुञ्जारवैः ॥ ४० ॥

इतश्च—

नानावर्णमणिप्रभाव्यतिकरप्रोन्मीलदिन्द्रायुधाः
संभ्रान्तभ्रमरावलीघनघटा व्याविद्धसूर्यातपाः ।
धारायन्त्रविमुक्तचन्दनरसासारातिसान्द्रीकृता
रथ्या वार्षिकयामिनीभ्रममहो नक्तंदिवं तन्वते ॥ ४१ ॥

(अन्यतो विलोक्य, सानुक्रोशम् ।) अहह ।

स्फटिकभवनभाभिश्चन्द्रिकाभ्रान्तिभाजः
स्फुरदरुणमणीभिर्दत्तसूर्यांशुशङ्काः ।
दिनरजनिविवेकव्याकुलाः कोकलोकाः
क्षणमपि न लभन्ते शोकनिर्मोकमस्याम् ॥ ४२ ॥

रामः—आयुष्मन्, पुरः प्रत्यासीदति राजभवनद्वारम् । यत्किल अधिरजनि निरस्तध्वान्तशङ्काकलङ्कै-
र्मणिगणकरजालैर्दुर्विभाव्यप्रवेशम् ।
कनकशिखरशृङ्गोत्तुङ्गरिङ्गत्पताका-
कुलचलकरशाखातर्जितस्वर्गलोकम् ॥ ४३ ॥

सुदामा—भगवन्, पुरतो निरूप्यताम् ।

एताः पश्य पुराङ्गनाः प्रविगलद्धम्मिल्लमल्लीस्रजो
व्यस्तं व्यस्तविभूषणाः सरभसं त्यक्तान्यकार्योच्चयाः ।
लीलालोलविलोचनैरुभयतः सौधावलीमाननैः
स्वर्गङ्गामिव दर्शयन्ति शफरीपर्यस्तपङ्केरुहाम् ॥ ४४ ॥

कृष्णः—अलमिदानीं नगरालोकनकौतुकव्यासङ्गेन । त्वरयतितरां पित्रोः पादपद्मदर्शनोत्कलिका । (नेत्रे निमील्य चिरं विभाव्य सप्रत्याशं प्राकृतमाश्रित्य ।)

*सो वि क्खणो हुविस्सदि जस्सिं तादस्स पाअकमलम्मि ।
भम्मन्तभमरविब्भमपडिलम्भो भोदि [मह] मत्थस्स ॥ ४५ ॥

(पुनर्ध्यानं नाटयन् ।)

उम्मीलिअपुलआइं फारिअलच्छीइँ पेम्मतरलाइं ।
भूओ बन्धुमुहाइं सुहाइँ मे देन्ति सुचिरदिट्ठाइं ॥ ४६ ॥

रामः—आयुष्मन्, अलमनया चिन्तया । कथमप्यनाश्वासः । ननूपनत एवास्य दितिजकुलकलङ्कस्य कंसस्यावसानसमयः । अनतिलङ्घनीयः खलु खलानां दुर्वृत्तदुर्विपाको न चिरादेव परिपच्यते । पश्य—

अम्भोधिः शतयोजनोऽस्य परिखा सालः सुवेलाचलो[1]
रक्षोभिः परिरक्षितानधिगतातङ्का च लङ्कापुरी ।

---

*सोऽपि क्षणो भविष्यति यस्मिंस्तातस्य पादकमले ।
भ्रमद्भ्रमरविभ्रमप्रतिलम्भो भवति [मम] मस्तकस्य ॥
उन्मीलितपुलकानि स्मारितलक्ष्मीनि प्रेमतरलानि ।
भूयो बन्धुमुखानि सुखानि मे दास्यन्ति सुचिरदृष्टानि ॥

---

१. 'पटीराचले' इति स्व-पाठः.

पुत्रः शक्रजिदुग्र एष वरदो भृत्यास्तथेन्द्रादय-
स्तस्याप्यस्य दशाननस्य भुवने वार्तापि न श्रूयते ॥ ४७ ॥
तदेहि । राजकुलमेव प्रविशामः ।

(इति निष्क्रान्ताः सर्वे ।)

इति पञ्चमोऽङ्कः ।

षष्ठोऽङ्कः ।

(ततः प्रविशति वेत्रपाणिपुरुषः ।)

पुरुषः—(स्वगतम् ।) अहो अस्य नरपतेर्नैर्दाक्षिण्यं नैर्घृण्यं च ।
तथा हि—
कति कति निहता न भागिनेया न च कतिधानुजयानुनीत एषः ।
तदपि न विरमत्यनल्पशक्तिः स्वजनवधादफलात्खलः प्रकृत्या ॥ १ ॥
(पुनः सनिर्वेदम् ।) हन्त भोः,

एषातितृष्णा कृष्णाहिर्भूभुजां हृद्विलेशया ।
परप्राणानिलैरेव प्रायः प्राणिति नान्यथा ॥ २ ॥

(निःश्वस्य ।) अहो अस्य दुर्मतेः प्रकृतिविरोधः ।
तथा हि—

राज्यं निर्जितनिर्जरोर्जितबलं संतर्जिताशागजं
दिक्पालामलमौलिलालितपदं स्वर्बन्दिभिर्वीजितम्[1] ।
संप्राप्याप्यकुतोभयं दितिकुलालंकारतामश्नुव-
न्नात्मानं हतमेव पश्यति शिशुप्रायैरपि प्राक्कृतैः ॥ ३ ॥

तदिदानीमस्येदृशं समारम्भं न शुभोदर्कं[2] तर्कयामि । यदुदाहरन्ति—

'प्रजापीडनसंतापात्समुद्भूतो हुताशनः ।
राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्तते' ॥४॥ इति ।

---

१. 'वर्जितम्' इति ख-पाठः. २. 'शुभोदयं' इति ख-पाठः.

अपि चायमनेककालार्जितमूर्जितं यशो भोजभूमीभुजामनुकलं कलङ्कयति । तदिह सर्वथा—

प्रत्यर्थिक्षितिपालबालवनितासीमन्तसिन्दूरिका-
लुण्ठाकप्रकटप्रतापदहनज्वालावलीसोदरे ।
त्रैलोक्योत्तरकर्मनिर्मितिपरिप्राप्तोदये हन्त भोः
सोऽयं भोजकुलस्य कीर्तिकदलीकण्ठे कुठारायते ॥ ५ ॥

अथ वा किमनेन ममारण्यरुदितेन । प्रेष्यवर्गेण हि राज्ञामाज्ञानुवर्तनं सुशकम्, न पुनरुपदेशः । तद्यथोपदिष्टमनुतिष्ठामि । (इति परिक्रम्य ।) भो भोः पर्यन्तवर्तिनः सामन्ताः, तत्रभवान्महाराजः समाज्ञापयति—यथा इयन्तं कालं वासुदेवः स्वजनगौरवादतिदीन इति बाल इति चोपेक्षितः । स चेदानीं दितिजकुलकालतया परिणममानो नोपेक्षाक्षणक्षेपं क्षमते ।

तथा हि—

प्रमादादज्ञानाद्दुरितपरिपाकादतिमदा-
द्विनश्यत्तावेशाद्यदपकृतमेतेन शिशुना ।
कथंचित्तत्सोढं पुनरयमिदानीं मधुपुरीं
प्रमथ्नात्यध्यक्षं तदिदमविषह्यं भवति मे ॥ ६ ॥

तदिदानीमप्रमत्ताः सज्जा भवत ।

रक्ष्यन्तां पुरतोरणाः कुवलयापीडः पुरः प्रेर्यतां
मल्लाः संनिपतन्तु युद्धकुशला योधाश्च घोरायुधाः ।
रच्यन्तां मखवीक्षणाय परितो मञ्चाश्च किं चोच्चकै-
र्हन्यन्तां दितिजारयः सरभसं प्राप्ता निजं गोचरम् ॥ ७ ॥

---

१. 'राज्ञामनुवर्तनं' इति क-पाठः. २. 'तत्रभगवान्' इति ख-पाठः. ३. 'भवथ' इति ख-पाठः. ४. कुवलयापीडः कंसस्य मत्तो हस्ती. ५. 'पुरतो' इति ख-पाठः. ६. 'प्राज्ञा' इति ख-पाठः.

(पुनः सानुक्रोशम् ।) अहो अनयोर्नन्दकुमारयोरात्मानपेक्षं चेष्टि-तं[1] । यतः—

वृद्धस्तातः समजवसति[2]र्गोपबालाः सहाया
यष्टिः शस्त्रं शयनमवनिः पाशुपाल्यं च वृत्तिः ।
सत्येतस्मिन्निभुवनमिलद्वीरवंशावतंसे
कंसे राजन्ययमविनयश्चेत्तयोर्हा प्रमादः ॥ ८ ॥

(नेपथ्ये कलकलः ।)

वेत्रधारः—(कर्णं दत्त्वा ।) आः, कथमयमसमयाशनिनिपातस्फूर्ज-दूर्जस्वलवज्रनिर्घोषभीषणप्रकटविकटकडकडारावभीषणः कोलाहलः समुल्लसति ।

(प्रविश्यातिविवशः ।)

प्राकोष्ठिकः—अरेरे नगरवासिनः, पलायध्वं पलायध्वम् । अय-मिह परापतित एव कंसकुलकालानलो हरिः । य एष—

निष्पिष्यैकेन वज्रादतिकठिनतरं मुष्टिनायःकवाटं
हत्वा रक्षान्भयार्तद्रवदखिलजनान्योन्यनिष्पेषदुःस्थम् ।
रुष्टाम्बष्ठ[3]प्रणुन्नाभिमुखकुवलयापीडमुत्पीडयिष्य-न्बर्हापीडावनाहं द्रढयति मनसारब्धझम्पानिपातः ॥ ९ ॥

वेत्रहस्तः—अये, कोष्ठपाल, स्थिरो भव तावत् । यावदावां कृष्ण-कुवलयापीडयोर्नियुद्धं दूरादेव स्थित्वावगच्छामः ।

कोष्ठपालः—(समाश्वस्य ।) तथा कुर्मः ।

(इति क्रीडापर्वताधिरोहणं नाटयतः ।)

वेत्रहस्तः—(पुरो निरूप्य साश्चर्यम् ।) कोष्ठपाल, इदं तावदवलोकय ।

---

१. 'चरितम्' इति ख-पाठः. २. समजः पशुसमूहः. ३. 'दुष्टाम्बष्ठ' इति ख-पाठः, अम्बष्ठो हस्तिपकः.

धाराभिर्दानवारां क्षितितलमखिलं पङ्किलं निर्मिमाणः
कुर्वाणो बृंहितेन प्रलयजलधरध्वानधिक्कारमारात् ।
अश्रान्तो दन्तकुन्तग्रथितघनघटास्फालनोद्भूतमूर्धा
क्रोधोत्क्षिप्ताग्रहस्तः प्रपतति रभसादुन्नदन्नेष दन्ती ॥ १० ॥

कोष्ठपालः—आयुष्मन्, एवमेतत्—

उन्मूल्यालानभूमीरुहमतितरसोत्खण्डितान्दूवितानान्-
याकर्षन्नेष पादैर्मदजलकलुषः क्षिप्तनक्षत्रमालः ।
शुण्डादण्डाभिघातैर्नभसि विदलयन्पुष्करावर्तकादी-
न्धावत्याधूतमूर्धा हरिमभिरभसा दैवनुन्नः करीन्द्रः ॥११॥

वेत्रधारः—(ससंरम्भम् ।) कोष्ठपाल, इतः पश्य नन्दशिशोः कृत-हस्ततालाघवातिशयम् ।

हन्तुं दन्तैरभीष्टः प्रविशति पदयोः शुण्डयाकृष्यमाणः
पश्चार्धान्निष्प्रपद्य भ्रमयति कलयन्पुच्छमेनं कराभ्याम् ।
उत्प्लुत्यारुह्य कुम्भं दलयति सृणिना वञ्चयित्वास्य दृष्टिं
मुष्टिभ्यां संपिनष्टि द्रुतमभिचलतोऽस्थीनि सव्यापसव्यम् ॥१२॥

(पुनः सविस्मयम् ।)

कृष्ण क्रीडसि किं चिरस्य विरम व्याहन्यते प्रस्तुतं
किं वा पौरुषमत्र ते पशुवधादित्यग्रजेनोदितः ।
पाणिभ्यां परिपीड्य हस्तमभितः संभ्रम्य पद्भ्यां गले
निर्मृद्योदहरद्धसन्निव हरिर्दन्तान्सहैवासुभिः ॥ १३ ॥

कोष्ठपालः—अहह, असमञ्जसम् । कथंविनिहत एव कुवलया-

---

१. 'दैवनुन्नः करीन्द्रः' इति ख-पाठः. २. अन्दू पादशृङ्खल. ३. 'रभसात्' इति ख-पाठः. ४. अङ्कुशेन.

पीडः । कुवलयापीडो महाराजविजयवैजयन्ती । तदिदानीं नाशंसे भोजकुलकुशलाय ।

वेत्रहस्तः—शान्तं पापम् । किमेतावता एकेनानेन विफलीकृतेन । नन्वस्ति प्रतिविधानान्तरं रचितम् । येन न चिरादेव माहाराजो निष्कण्टकां महीमुपभोक्ष्यते ।

कोष्ठपालः—किं तत । कथय तावत् । येन मे हृदयं समाश्वसिति ।

वेत्रहस्तः—तन्निभृतमाकर्ण्यताम् । प्रागेव राज्ञा मन्त्रितमेतत् । यत्किल कथंचिद्यदि कुवलयापीडोऽपि पीड्येत ततो मल्लयुद्धरङ्गप्रसङ्गं प्रस्ताव्य तद्दर्शनव्याजेन नानादेश्यान्वीरभटानुपढौकयिष्यामः । तद्दिदृक्षाकुतूहलादस्मदाकारणगौरवाद्गर्वोत्सेकाच्च तत्रोपसीदन्तौ रामकृष्णौ मल्लरङ्गकौतुकव्याजेन व्यापादयिष्याम इति । तदादेशाच्च मया प्रागेव सर्वं सुविहितम् । तथा हि—

प्राकारैः परिखावटैरुपचितः प्राग्रङ्गवाटः कृतः
कापट्ये पटवो भटाश्च विकटाः कूटादयो ढौकिताः ।
विन्यस्ताः शलतोशलप्रभृतयो द्वारेषु मल्लाः खलाः
सर्वेषामुपरि स्वयं विजयते कंसः समं बन्धुभिः ॥ १४ ॥

कोष्ठपालः—(सहर्षम् ।) साधु भोः कुटिलनीतिपण्डित, साधु । संविहितमेतत् । उदाहरन्ति च—

'सुप्तं निशि प्रमत्तं वा घातयन्ति रिपुं नृपाः ।
विषेण वह्निना वापि च्छलेन च बलेन च ॥१५॥' इति ।

वेत्रधारः—तदागच्छ । मल्लरङ्गभूमिपरिसरमेवानुसृत्यानयोः पौरुषं परीक्षिष्यावहे ।

---

१. आकारणमाह्वानम्. २. परिखारूपगर्तैः. ३. 'परीक्षिष्यामहे' इति क-पाठः.

कोष्ठपालः—एवमस्तु ।

(इति निष्क्रान्तौ ।)

(प्रवेशकः ।)[1]

(ततः प्रविशतो रामकृष्णौ चाणूरमुष्टिकाभ्यां प्रत्यवतिष्ठमानौ ।)

कृष्णः—

रे रे द्वारावरोधं जहिहि वितर नो रङ्गवाटे प्रवेशं

चाणूरः—

शूरा एव प्रवेश्या न तदितर इति क्ष्मापतिर्नः प्रशास्ति ।

कृष्णः—(विहस्य ।)

शूरं मां वेत्ति कंसो न किमिह

चाणूरः—

कुलतो वेत्ति नो कर्मतस्तत्

कृष्णः—

मैवं वादीरपार्थं न दधति कुलजा मामका नामधेयम् ॥ १६ ॥

मुष्टिकः—चाणूर, सत्यमेतदाह कृष्णः । यतः श्रुतपूर्वमस्माभिर्महाराजेन च, यत्किल गोकुले महाबलैर्गोपालैः सह मल्ललीलाविनोदमनुभवन्तौ नि शेषितानेकवीरवर्गौ निसर्गदुर्मदोत्सिक्तौ मथुरामण्डलं मण्डयत इति । एतदेव चोपश्रुत्य वीरसमरदिदृक्षाकुतूहलिना महाराजेन सबहुमानमानायितावेतौ । प्रवर्तितश्च रङ्गप्रसङ्ग एतयोः प्ररोचनार्थम् । तदेताभ्यामप्यस्य राज्ञो मनोरथः संपादयितुमुचित एव । (कृष्णमुद्दिश्य ।)

राजाज्ञानुनिवर्तनं हि परमो धर्मः प्रजानामयं
लाभख्यातिमहत्त्वसंपदपरो दोर्दण्डकण्डूमृजा ।
तन्मे दर्शय युद्धकौशलकलां मत्प्रत्ययादेव हि
प्रीयेत प्रभुरन्यथा तु भवतोः प्रत्यागतिर्दुःशका[2] ॥ १७ ॥

---

१. 'प्रवेशकः' इति पुस्तकद्वयेऽपि नास्ति. २. 'दुर्लभा' इति क्व-पाठः.

कृष्णः—

नो युक्ता युद्धचर्चा समरविजयिभिर्वीरगोष्ठीगरिष्ठै-
र्युष्माभिर्बल्लवानां वनभुवि वसतां राजदण्डोचितानाम् ।
नो चेत्त्वामन्तरेण प्रतिहतगतयः शक्नुमो हन्त गन्तुं
तद्यूयं युद्धशिक्षां वितरत कृपया सिद्धविद्याप्रदानात् ॥१८॥

चाणूरमुष्टिकौ—(सहर्षम् ।) अनुमतमेतत् । तद्बध्यतां परिकरः ।

रामकृष्णौ—(तथा कृत्वा उभौ प्रति ।)

यथासंख्येन[1] युवयोरस्त्वाचार्यकमावयोः[2] ।
कृतहस्तौ यथा शीघ्रं तोषयामोऽद्य मातुलम् ॥ १९ ॥

चाणूरः—साधु मन्त्रितम् । मुष्टिक, त्वं तावदेनं बालशिक्षया दीक्षय । अहमप्येनम् ।

(इत्यन्योन्यं पाणी परामृशतः ।)

रामकृष्णौ—आचार्य,

बालौ च बालिशौ चावां न विद्मो युद्धकौशलम् ।
किं तु

भवच्चेष्टानुकरणं करिष्यामः कियच्चिरम् ॥ २० ॥

चाणूरमुष्टिकौ—(स्वगतं सहर्षम् ।) अहो महाभाग्यं महाराज-कंसस्य । महांश्चासौ बुद्ध्यतिशयः । यदशक्यप्रतीकारावप्यनेनोपायेन सुनिग्रहाविति विचिन्त्य तथा संविधानं व्यधत्त । असद्भाग्यवशाच्चेता-[3]वप्यत्यन्तानभिज्ञौ दैवेन पशूकृत्योपहृतौ । तदेतावकृच्छ्रेणैव करतलेन मत्कुणाविव संमृद्य राज्ञः पारितोषिकमाहरिष्यामः । (प्रकाशम् ।) रामकृष्णौ, साधु मन्त्रयेथे ।

---

१. 'यथासंख्यं न' इति ख-पाठ.. २. 'आर्ययोः' इति ख-पाठः. ३. 'भागधेयवशात्' इति ख-पाठः.

आदावावां यद्यदङ्गमभिहन्मो यथा यथा ।
तथा तथानुवर्तेथां शिक्षायामेष हि क्रमः ॥ २१ ॥

रामकृष्णौ—यथादिशतमाचार्यौ । (इति द्वन्द्वयुद्धमनुकुरुतः ।)

तथा हि—

अंसेनांसं मुष्टिनामुष्टिमुरू हत्वोरुभ्यां वक्षसा चापि वक्षः ।
शीर्षं शीर्ष्णा चाथ पादौ पदाभ्यां दोर्भ्यां दोषौ जघ्नतुस्तौ यथेष्टम् ॥२२॥

चाणूरमुष्टिकौ—(स्वगतम् ।) अहो बालयोरप्येतयोर्घनघात्यान्यति-कठोरतराण्यङ्गानि । येषां प्रहारो वज्रादप्यतिदुःसहोऽस्माकं मर्माणि पीडयतितराम् । (पुनर्निर्वर्ण्य ।) कथमस्य वीररसरभसोत्सेकतुङ्गान्यङ्गानि प्रतिक्षणमुपचीयमानप्रभावातिशयदुष्प्रेक्षणीयानि लक्ष्यन्ते ।

तथा हि—

ऐन्द्रो वज्रः किमथ दहनो वाडवः कालकूटः
किं वा कूटः प्रलयजलदः पुष्करावर्तकः किम् ।
किंस्वित्पुञ्जः प्रलयतडितां द्वादशार्कोदयः किं
यस्यालोके भवति नितरामिन्द्रियाणां प्रमोषः ॥ २३ ॥

तदस्माकं नास्ति जीवन्मुक्तिप्रत्याशा । परमसुक्तिमेव तु निर्विवादं निश्चिनुमहे । तथापि न युद्धादुपरमामः । यतः—

दैवाधीनः समिति विजयश्चेदुपस्थास्यतेऽस्मां
स्तद्भूमर्तुः प्रथितयशसो वल्लभाः स्याम नूनम् ।
मृत्युर्वा चेन्निदशतरुणीचामरव्यग्रहस्त-
प्रेङ्खद्धूपारणितसुभगं स्वर्गराज्यं भजेम ॥ २४ ॥

(प्रकाशम् ।) रे रे गोपालबाल दुर्ललित, नेदानीं भविष्यसि ।

कृष्णः—(विहस्य ।) सत्यमात्थ । ननु रे, नहि नित्यभूतः पुनर्भवति ।

(नेपथ्ये ।)

जङ्घावन्धभ्रमणपतनस्थानकश्येनपात-
ग्रीवास्कन्दप्लुतनिलयनैर्मेषयुद्धप्रचारैः ।
उत्क्षिप्योच्चैः क्षितिमधिजवात्पातितः केशवेन
क्षीणप्राणः शिव शिव लुठत्येष चाणूरमल्लः ॥ २५ ॥

वेत्रधरः—(सावेगम् ।) कथमसौ निहत एव । तथा हि—

उद्भिन्नोदरकंदरोद्गिरदसृग्धाराकरालाननः
क्रोधाध्मानविघूर्णमानतरलक्रूराक्षितारोत्करः ।
नासारोकपरीक्ष्यमाणकृपणप्राणप्रयाणक्षणो
नष्टाशेषविचेष्टितो गिरिरिवाध्यास्ते क्षितिं कम्पयन् ॥२६॥

कोष्ठपालः—हा धिक् कष्टं भोः ।

मुष्टिभिर्मुष्टिकोऽप्येष प्रलम्बरिपुणा हतः ।
कृतोऽद्य कृतहस्तोऽपि कृतान्तसदनातिथिः ॥ २७ ॥

वेत्रधरः—अहह, असमञ्जसमसमञ्जसम् ।

निर्दोषाविव दोषौ[2] जयश्रियो राज्यमण्डपस्तम्भौ ।
चरणौ नीतेर्नयने सिद्धेरिव यद्धतावेतौ ॥ २८ ॥

तदिदानीं दुरवस्था जयास्था ।

(पुनर्नेपथ्ये कलकलः ।)

हन्त भोः,

हत्वा दौवारिकाणां नियुतमसिभृतां मुष्टिनैकेन पिष्ट्वा
कूटं कूटप्रवीणं शलमपि कुशलं संगरे तोशलं च ।
भित्त्वा द्वारावरोधं दलितकुवलयापीडदन्तैकशस्त्रौ
मध्येरङ्गं प्रविष्टौ मदकलकलभोद्भासिनौ रामकृष्णौ ॥ २९ ॥

---

१. नासारन्ध्र. २. 'भुजौ'.

वेत्रधरकोष्ठपालौ—(आकर्ण्य सातङ्कम् ।) तंदिदमिदानीमनर्गलं कंसस्य स्वंशरीरमात्रचिकित्सनीयमत्याहितमुपस्थितम् । न पुनरत्र कंचित्प्रतीकारं पर्यालोचयावः । भवतु तावदिमं पूर्ववृत्तं वृत्तान्तं महाराजाय निवेद्यावहितौ प्रत्यनन्तरीभूय प्राणव्ययेनापि स्वामिभक्तिव्रतमनुवर्तावहे । (इति निष्क्रान्तौ ।)

(ततः प्रविशतौ रामकृष्णौ)

कृष्णः—(सर्वतो निरूप्य सहर्षम् ।) अहो रमणीयता रंङ्गवाटस्य । यतः—

प्राकारा मणकुट्टिमैरुपचिताः स्थूलेन्द्रनीलोपल-
प्रायाः प्राङ्गणभूयसः सितशिलासंदर्भगर्भोज्वलाः ।
मुक्ताहीरकतारहारतरलस्रग्गन्धदीपाम्बर-
प्रोद्भूतागुरुसारधूमशबलाश्चास्थानिका मण्डपाः॥ ३० ॥

रामः—(निर्वर्ण्य साश्चर्यम् ।) अये, विश्वविलक्षणैवैषा सृष्टिः । तथा हि—

न स्रष्टा सृष्टिमेतां विरचयितुमलं विश्वकर्मापि नैत-
त्कर्माभिज्ञो न सुज्ञः प्रतिहतविबुधाशेषमायो मयोऽपि ।
नायं लोको बलारेर्न च बलिनिलयो नापि वैकुण्ठपीठी
नाप्यन्यस्यानुबिम्बः किमयमुदयते दृष्टिबन्धः प्रबन्धः॥३१॥

(उच्चैर्मञ्चानिरूप्य ।) अये, कथममी स्वस्वकाष्ठामधिष्ठिता नानादिगन्तागता दिक्पाला इव भूपालाः सदा रङ्गमण्डलं मण्डयन्ति । तथा हि—

---

१. 'तदिदानीं' इति **ख**-पाठः. २. 'स्वशरीरमात्रं' इति **क**-पाठः. ३. 'यज्ञवाटस्य' इति **ख**-पाठः. ४. 'प्रोद्भूता' इति **क**-पाठः. ५. 'विविधाशेष' इति **क**-पाठः. ६. 'दृष्टिबन्धप्रबन्धः' इति **क**-पाठः.

लीलादोलायमानोन्नमदमलशिरःशेखरश्रेणिरोह-
द्रोचिर्वींचिप्रपञ्चच्छलवलदमितोद्भ्रान्तकान्तप्रतापाः ।
एते राजन्यगोष्ठीव्यतिकररभसोत्सर्पिदर्पप्ररोह-
प्राग्भारस्फारवक्षस्तटविकटलुठल्लोलमाला नृपलाः ॥३२॥

(अत्युच्चैरवलोक्य कृष्णं प्रति ।) आयुष्मन्, कथमयं सप्तभूमिप्रासादशिख-रशेखरीभूतां क्रीडाभवनवलभीमसद्दिदक्षोत्कलिकाकुलो मातुलोऽलंक-रोति । तदस्याकुण्ठोत्कंठोपशमाय सत्वरमुपसर्पामः ।

(इति सोपानारोहणं नाटयतः ।)

कंसः—(दूरादवलोक्य सोद्वेगं ससंभ्रमं च सहसोत्थाय ।) रे रे सामन्ताः सदस्याः,

निःसार्यतामिमौ पापौ कुलाङ्गारौ मदोद्धतौ ।
मच्चक्षुःसंनिपातामौ यावन्न शलभायितौ ॥ ३३ ॥

सभ्याः—(सर्वे समाकर्ण्य सादरमवलोक्य सानन्दम् ।) अयमयं भोः,

मल्लक्रीडाश्रमजलकणाकीर्णमुग्धाननश्रीः
पीतस्फीताम्बरपरिकरो बर्हपिच्छावतंसः ।
कण्ठोल्लुण्ठत्कमलवलयामृष्टवक्षोजरागः
स्कन्धासक्तद्विरददशनः साग्रजोऽग्रेऽभ्युपैति ॥ ३४ ॥

(पुनः परिभाव्य सानुक्रोशहर्षम्[1] ।) अहह, कथमिमौ सुकुमारतराकृती नन्दगोपकुमारौ निरीक्षमाणानामस्माकमन्तरात्मा प्रशान्तपावनत्वमव-गाहते । तथा हि—

राकासुधाकरमुधाकरचारुवक्त्र-
मिन्दीवरोदरसहोदरमेदुराङ्गम् ।

---

१. 'सानुक्रोशं सहर्षम्' इति क-पाठः.

कृष्णं बलं च घनसारपरागगौरं
दृष्ट्वा सुधाम्बुधिनिमज्जनमेति चेतः ॥ ३५ ॥

(पुनः सानुक्रोशम् ।) हन्त भोः, कथमयं महाराजस्य महान्धर्मव्यतिक्रम उपस्थितः । यतः—

बालस्वभावचपलावज्ञातगुणदूषणौ ।
नयनानन्दनिःष्यन्दौ कूटयुद्धैर्जिघांसति ॥ ३६ ॥

अपि च । न केवलमिहं महाराज एवापराध्यति, अपि तु तद्दाक्षिण्यादनिवारयन्तः सदस्या अपि । यदुदाहरन्ति—

न योध्याः स्त्रीबालस्थविरकृशषण्ढासमबला
न मत्तोन्मत्तार्ता न कृपणगिरो नापि विमुखाः ।
अतिक्रामन्नेतत्पतति नृपतिस्तस्य सचिवा-
न्ससभ्यानभ्येति द्विगुणितमधर्मोऽनुसरतः ॥ ३७ ॥

अपि च—

न वारणो यस्य निवारणाय न वा रणो दोर्मदवारणाय ।
अलं बभूवास्य निरोधनाय कथं भवेमाद्य विरोधनाय ॥ ३८ ॥

तदेतत्सराजकं राष्ट्रं प्रहीणप्रायमपि परिहातुमस्माकमुचितम् ।

(पुनर्नेपथ्ये ।)

अरे रे, कथमिमावतिक्रम्यासच्छासनमकुतोभयाविवेत एवाभिवर्तेते । तदेतौ राजद्रोहिदण्डरीत्या आततायिवधेन च नातिदूरेण निग्रहीतव्यौ । (पुनः सरोषम् ।) हंहो, किमतः परमपि दाक्षिण्यसंरक्षणेन ।

वध्यन्तां व्रजवासिनः सतनया नन्दादयः सत्वरं
हन्तव्यः प्रतिपक्षतामनुसरन्कि चोग्रसेनः पिता ।
बन्धव्यौ निगडैर्दृढैश्च भगिनीभामौ निकारोचितौ
निग्राह्यौ नितरां चिराय विविधैर्दण्डाभिघातोद्यमैः ॥ ३९ ॥

रामः—(कृष्णं प्रति ।) आयुष्मन्, किमद्यापि प्रतीक्ष्यते पश्य ।

रोषावेशप्रदष्टाधरमलिकतटभ्रूकुटीभङ्गभीमः
क्षुभ्यत्तारारुणाक्षः सयविधुतशिरःशेखरस्रस्तकेशः ।
कक्षेराक्षिप्य कौक्षेयकमलघुललत्कालजिह्वाकरालं
देवारिर्योद्धुमस्मानयमतिरभसादासनादुज्जिहीते ॥ ४०

कृष्णः—(विहस्य ।) आर्य,

रजसान्धमनात्मज्ञं स्वजनं मातुलं नृपम् ।
हन्तुं मनो न वलते कारुण्यप्रवणं मम ॥ ४१ ॥

रामः—(सरोषम् ।)

आः क्षत्रियात्मज नैष विमर्षकालः
क्षत्रस्य संगरमुपेयुष एष धर्मः ।
विश्वद्रुहः किल खलानसिलूनिहन्तुं
विश्वाश्रयस्य भवतो भवतोऽवतारः ॥४२॥

कृष्णः—(सविचिकित्सम् ।) अनतिक्रमणीय आर्यादेशः सत्वरमुपसर्पति ।)

(नेपथ्ये कलकलः ।)

हन्त भोः,

क्रोधोद्धूतासिधेनूद्धृतपरिघगदापट्टिशप्रासकुन्त-
प्रोद्यच्चर्मासिचक्राकमजघनघवकाणघोरीकृताशम् ।
क्षिप्त्वा योधाकरोघं हरिरिव कलभं रक्षितक्षस्य कुक्षे-
र्मद्राद्रुक्षैरकक्षैः कलकलिकचः कंसमाकर्षति क्षाम् ॥४३

अपि च—

अगणितपरपक्षः श्येनपातं पतित्वा
चटकमिव गृहीत्वा कंसमुच्चैः कचेषु ।
अनुपतति शिलायां पोथितं पातयित्वा
व्यसुमपि गुरुवैराद्धन्त मृद्नाति पद्भ्याम् ॥४४॥

(सर्वे सातङ्कमाकर्णयन्ति ।)

कृष्णः—(निपुणं निरूप्य, साश्चर्यम् ।) अहो, महदद्भुतमेतत् ।

शृण्वानस्याद्वितीयं निरवधिसहजानन्दसंवित्स्वरूपं
मन्वानस्यातिचित्राकृतिप्रतिविषणाशक्तिरूपोपपत्त्या ।
विश्वं कृष्णाद्वितीयं भयचकितधिया ध्यायतश्चान्तकाले
ज्योतिर्ज्योतिःस्वरूपे मगवति विशतिब्रह्मरन्ध्रं विभिद्य ॥४५॥

(रामः सत्वरमुपसृत्य कृष्णमालिङ्ग्य मूर्धानमाजिघ्रति । कृष्णो विमना इवाधोमुखस्तिष्ठति ।)

रामः—आयुष्मन्, न युक्तं हर्षस्थाने वैमनस्यम् । पश्य तावत्स्वर्वासिनामप्युत्सवम् । यतः—

उच्चैर्दुन्दुभयो नदन्ति परितो नृत्यन्ति वाराङ्गनाः
पाथोदाः पथि सेचनाय मधुरं वर्षन्ति गर्जन्ति च ।
सद्यो दैत्यवधप्रहृष्टहृदया देवाश्च गन्धोद्धुरं
स्वर्नारीकरलूनपुष्पनिकरं मुञ्चन्ति भक्त्या स्तुतेः ॥ ४६ ॥

कृष्णः—(सस्मितम् ।) आर्य, स्वजनघातपातकक्लिन्नमात्मानं नाभिनन्दामि । गुरुलज्जाभराक्रान्तमाननं च नोन्नमयितुमीशे । लज्जाविमर्षकृतसाहसात्परितप्यते मे चेतः ।

रामः—आः, कथमतिमुग्धोऽसि । न खलु समरविहारिणो वीरान्हत्वा हिंसादोषेण लिप्यन्ते । विशेषतस्त्वाततायिवधे । यत्स्मरन्ति—

'आततायिनमायान्तमपि वेदान्तपारगम् ।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥४७॥' इति ।

तदेहि । राजापायविरहशोकावेशविवशं राजावरोधं परिसान्त्वयितुमन्तःपुरं प्रविशामः ।

कृष्णः—एवमस्तु ।

(इति निष्क्रान्ताः सर्वे ।)

इति षष्ठोऽङ्कः ।

सप्तमोऽङ्कः ।

(ततः प्रविशति विश्वकर्मा ।)

विश्वकर्मा—आदिष्टोऽस्मि तत्रभवता वासुदेवेन भगवता । यथा किल—

निःशल्या निरमायि यद्यपि मही संहृत्य दैत्याधमान्
भोजानां कुलमुज्ज्वलं विरचितं भिन्नांश्च कारागृहाः ।
स्वर्बन्धः प्रतिमोचितः क्रतुभुजश्चासन्कृतार्थास्तथाप्येतद्राष्ट्रमराजकं न हृदयस्वास्थ्याय कल्पिष्यते ॥ १ ॥

तदद्य तदीये पदे तत्पितरमुग्रसेनमसन्मातामहमभिषेक्तुमिच्छामि । तदत्र सबहुमानमाहूयन्तां तस्य पापीयसो भिया पलायिता असदनुरागिणः पौराः । संनिपात्यन्तां च भोजवृष्ण्यन्धककुरुप्रभृतयो राजानश्च । निर्मीयन्तां पुराद्यलगोपुरप्रासादपरिसरोद्यानविहारभूमयः । प्रसाध्यन्तां

---

१. 'विशिष्य त्वाततायि' इति 'क'-पाठः. २. 'भित्त्वा च कारागृहान्' इति 'ख'-पाठः. ३. 'कुकुरप्रभृतयो' इति 'ख'-पाठः.

च राजपथनगरवीथीद्वारतोरणसौधशिखरप्राकारप्रकराः[1] । प्रवर्त्यन्तां च मङ्गलाचारगीततूर्यरवाः । उद्घोष्यन्तां च सौविस्तिकब्राह्मणमन्त्रघोषाः । प्रनर्त्यन्तां[2] च सर्वासिवाराङ्गनासहस्राणि । संभ्रीयन्तां च राज्याभिषेकोचिताः संभाराः । आघोष्यन्तां[3] च दिण्डीरवाः । यत्किल—

'रच्यन्तां राजमार्गाः प्रशमितरजसः स्वर्गवाटीपटीरै-
र्वध्यन्तां तोरणानि त्रिदशपतिधनुर्मण्डलोड्डामराणि ।
उच्छ्रीयन्तां पताकाः सुरपुरतरुणीस्वेदविच्छेददक्षाः
सृज्यन्तां भूरिभेरीमुखरवमुखरा भूर्भुवःस्वर्गलोकाः ॥२॥ इति'

तदिह तावदपरं सर्वं मयैव सुविहितम् । अभिषेकसंभारसंभरणं तु ब्राह्मणैर्विधेयम् । तदत्रभवन्तं कुलाचार्यं शाण्डिल्यनामानमन्वेषयामि यावत् । (इति पुरः सर्पति ।)

(प्रविश्य ।)

शाण्डिल्यः—आयुष्मन्विश्वकर्मन्, क्व प्रस्थितोऽसि ।

विश्वकर्मा—आर्य, भवन्तमेवान्वेष्टुम् ।

शाण्डिल्यः—तदुच्यतां प्रयोजनम् ।

विश्वकर्मा—

कंसं निहत्य दनुजाननुजांश्च सप्त
निष्कण्टकां भुजबलेन विजित्य पृथ्वीम् ।
मातामहाय भगवान्विनिवेद्य तस्य
राज्येऽभिषेक्तुमँसुमिच्छति विश्वगुप्त्यै ॥ २ ॥

शाण्डिल्यः—विश्वकर्मन्, कुतः पुनरयं भगवानात्मतन्त्रे जगति

---

१. 'प्रासादप्रकराः' इति ख-पाठः. २. 'प्रनृत्यन्तां' इति क-पाठः. ३. 'आघोष्यतां च डिण्डीरवः' इति क-पाठः. ४. 'अभिषिञ्चति' इति ख-पाठः.

निजभुजबलार्जितमपि प्राज्यं राजमन्यसै प्रतिपादयति । न पुनः स्वयमेवाभिषिञ्चते[1] ।

विश्वकर्मा—अये, बालिशोऽसि । यतः—

स्वाराज्यादिसुखानि यस्य सहजानन्दाम्बुधेर्विप्रुषो
ब्रह्माण्डानि वसन्ति यस्य कुहरे रोम्णः परार्धात्परम् ।
लीलाबालतनोश्चराचरगुरोराश्चर्यचिन्तामणे-
र्विक्षेपाय न चेतसः प्रभवति क्षुद्रेहगर्थैषणा ॥ ४ ॥

शाण्डिल्यः—ननु भणामि ।

षट्पञ्चाशत्कोट्यो यादवानां
व्याप्याशेषं विश्वमध्यावसन्ति ।
तेष्वेवैकः कोऽपि किं नाभिषिक्तो
भक्तः शक्तो जातु नार्हत्युपेक्षाम् ॥ ५ ॥

विश्वकर्मा—अस्त्यत्र किंचिन्निगूढं बीजम् ।

शाण्डिल्यः—तन्निभृतं कथय ।

विश्वकर्मा—ययातिदत्तो यदोः शापः । न तद्वंश्या राज्यभाजनं भवन्तीति महतीयं कथा पुराणेषु गीयते । अपि च—

निहते सहजे कंसे देवकी विमनीभवेत्[2] ।
इति तत्परितोषाय तत्तातमभिषिञ्चति ॥ ६ ॥

तदास्तामप्रस्तुतमेतत् । प्रकृतमनुवर्त्यताम् ।

शाण्डिल्यः—क्व पुनरिदानीं भगवान् ।

विश्वकर्मा—मामस्मिन्कर्मणि नियुज्य स्वयं देवकीवसुदेवयोर्निगडभेदनाय कारागारं सहाग्रजेन प्रविष्टः ।

---

१. 'अभिषिच्यते' इति क-पाठः. २. 'विमना भवेत्' इति ख-पाठः.

शाण्डिल्यः—तर्हि तत्रैवैनमनुसरामि ।

(इति निष्क्रान्तौ ।)

प्रवेशकः ।[1]

(ततः प्रविशतो रामकृष्णौ देवकीवसुदेवौ च ।)

देवकीवसुदेवौ—(पुत्रावालिङ्ग्य मूर्धन्यवघ्राय च सास्रम् ।) हा वत्सौ, अद्याभूतां भवन्तौ वयमपि तादिमे जीवलोकं प्रविष्टा

व्युष्टा[2] शोकत्रियामा समजनि सुचिरात्प्रेत्यभावोऽस्मदक्ष्णोः[3] ।
संसारोऽभूत्ससारः समुदितमहिमज्योतिषाद्यैव दिष्ट्या
यद्दृष्ट्यालम्भि[4] युष्मद्वदनशशिसुधापूरदूरावगाहः ॥ ७ ॥

देवकी—

नोत्सङ्गे परिशायितौ न च कराकुल्यापि संचारितौ
न स्तन्यं परिपायितौ न मधुरैर्गीतैश्च संलालितौ ।
सस्नेहं न निरीक्षितौ स्खलितया वाचापि नोल्लापितौ
वन्ध्यायाः इव वासरा मम गता लब्ध्वा, भवन्तौ सुतौ ॥८॥

रामकृष्णौ—

आ जन्म प्रतिवासरं बहुविधेनासत्कृतेनागसा
दैत्येन्द्रेण विबाधितौ किल युवां नानाविधैर्बन्धनैः ।
नाभ्यां तनयोचितं विरचितं किंचित्कदाचिन्मतो
वात्सल्यादपराध्यतोरविनयं क्षन्तुं युवामर्हथः ॥ ९ ॥

(इति साष्टाङ्गपातं पादयोः पततः । पितरावुत्थाप्य चिरमालिङ्गतः ।)

कृष्णः—(सभयमञ्जलिं बद्ध्वा ।)

---

१. 'प्रवेशकः' इति पुस्तकद्वयेऽपि नास्ति. २. शोकरूपा रात्रिः प्रभातेत्यर्थः. ३. प्रेत्यभावः पुनरुत्पत्तिः. ४. 'यद्दृष्ट्या' इति ख-पाठः. ५. 'संलालितौ' इति ख-पाठः.

मातस्ते निहतो भ्राता दुरात्मा कुलदूषणः ।
मैन्तुमेनं न मे मन्तुं परं तु क्षन्तुमर्हसि ॥ १० ॥

देवकी—वत्स, मैवं वादीः ।

उपभुङ्क्ते निजं कर्म शुभं वा यदि वाशुभम् ।
इहामुत्र च सर्वोऽपि न तत्रान्योऽपराध्यति ॥ ११ ॥

कृष्णः—(सानन्दम् ।) उज्जीवितोऽस्मीदानीं शापशङ्कातङ्कसंतापात् । (पुनः साञ्जलिबन्धनम् ।) जनकौ, यद्यनुगृहीतोऽस्मि तर्हिकिंचिद्विज्ञापयामि । यत्किल दैवकृतात्मामादिकाद्वापराधात्संप्रत्यराजकं जगदिदमास्ते । न चाराजकं राष्ट्रमिष्टानिष्टप्राप्तिपरिहारयोः प्रभवति । यदुदाहरन्ति—

'अनायका विनश्यन्ति नश्यन्ति बहुनायकाः ।
स्त्रीनायका विनश्यन्ति नश्यन्ति शिशुनायकाः ॥१२॥' इति ।

तन्नासदभिजनेषु बहुषु संनिहितेष्वप्यसन्मातामह उग्रसेन एव तदास्पदेऽभिषेक्तव्य इति जायते मे मनोरथः । यदि पितरावनुमन्येते ।

देवकीवसुदेवौ—प्रथमः कल्पः । अनुमतमेतदावयोरपि ।

कृष्णः—यद्येवं तर्हि भवत्पुरःसरा मातामहाभिषेकमहोत्सवमनुवर्तामहे ।

रामः—तदिह सर्व एव वयं कृतस्नानप्रसाधनादिमङ्गलाः श्रममपनीयाभिषेकमण्डपपरिसरमध्यास्य कृताकृतमवेक्षमाणाः समाजकौतुकमनुभवामः ।

सर्वे—एवमस्तु । (इति मन्यन्ते ।)

कृष्णः—(रामं प्रति ।) आर्य, यावत्पितरौ कृतप्रसाधनौ राज-

---

१. अपराधम् ।

द्वारमुपसीदतस्तावदावां कृताभिषेकं महाराजमुपासीना पित्रोरागमन-मावेदयावः ।

रामः—यथाभिरुचितमायुष्मते ।

(इति निष्क्रान्तौ ।)

(ततः प्रविशत्युग्रसेनो रामकृष्णौ च ।)

रामकृष्णौ—महाराज, देवकीवसुदेवौ भवन्तं द्रष्टुकामा प्रतीहार-भूमिमुपासाते ।

राजा—(ससंभ्रमम् ।) आः, किमत्रावेदनविलम्बेन । अहमेव गत्वा तौ प्रवेशयामि । (इति सहसोत्थातुमिच्छति ।)

रामकृष्णौ—महाराज, न युक्तमिदानीमभिषिक्तस्य सर्वेश्वरपदे प्रतिष्ठितस्य स्वविधेयासु प्रजासु प्राकृतस्येव बाह्योपचाराचरणम् । तदावामेव महाराजानुज्ञया प्रवेशयावः ।

राजा—नात्र किमप्युत्तरं प्रतिभाति । अतिमानार्हौ स्वस्त्वेतौ न विलम्बमर्हतः प्रियसमागमस्य ।

(रामो निष्क्रम्य पितृभ्यां सह प्रविशति ।)

देवकीवसुदेवौ—(पुरो निरूप्य ।) अये, कथमयमुग्रसेनोऽत्युग्रो-त्कण्ठापूर्णकण्ठस्तूर्णोपकल्पितानल्पार्हणोपकरणोऽतिरभसश्चलितेनान्तः-करणेनोत्तिष्ठमानोऽपि परिसरोपसन्नसेवागतानेकराजलोकोपदिष्टाभिषि-क्ताचारविरोधनिरुद्ध इवास्ते । (निपुणं निरूप्य ।)

अयमुदयमहीभृत्तुङ्गशृङ्गाग्रसङ्गी
दिनमणिरिव दीव्यत्युच्चसिंहासनस्थः ।

---

१. 'राजानं' इति ख-पाठः. २. 'निवेदयामः' इति ख-पाठः. ३. 'राम-कृष्णौ' इति पुस्तकद्वयेऽपि नास्ति. ४. 'वलितेन' इति क-पाठः. ५. 'उपपन्न' इति ख-पाठः.

ललितकनकवेत्रेणाच्युतेनाग्रभूमौ
सविनयमतिदूरं वारितामात्यभूपः ॥ १३ ॥

तदुपसर्पावस्तावत् ।

कृष्णः—महाराज, एतौ देवकीवसुदेवौ भवन्तमभिवादयेते ।

राजा—आः, कथं देवकीवसुदेवौ । दिष्ट्या जीवलोकं प्रविष्टोऽसि । (इति संरभसमुपसृत्यालिङ्गति । सांत्रम् ।) हन्त भोः,

बाष्पोत्पीडः स्थगयति दृशौ गद्गदः कण्ठपीठं
शोकावेगो दहति हृदयं चेतनामुच्छिनत्ति ।
कृच्छ्रान्मुक्तौ कथमपि चिरात्संगतौ वां न चेशे[1]
वाचा संभावयितुमिह हा चक्षुषा चेतसा वा ॥१४॥

देवकीवसुदेवौ—देव, दैवायत्ते साधारणे च विषये नार्हसि आत्मानं विषादयितुम् । (इत्यन्योन्यमश्रूणि परिमृजन्ति[2] ।)

राजा—इत आस्यताम् । (इत्यर्धासने संमुपवेशयितुमाकर्षति ।)

देवकी—नोचितमस्माद्विधैरिदमीदृशमासनमध्यासितुम् ।

राजा—(विहस्य ।) अये, कथमहं रामकृष्णाभ्यामीदृशे कर्मणि नियुञ्जानाभ्यां स्वजनव्यवहारबाह्यः कृतोऽस्मि । (इति स्वसंनिहित आसने समुपवेशयति ।)

देवकी—महाराज, यदीदानीमपि ज्ञातेयमनुरुध्यते तर्हि वत्सयोः रामकृष्णयोः कृतागसोर्दुर्ललितयोरपि परेभ्यो महाराजेन भक्तावनुरक्तावनुचरौ ज्ञाती इति वा संरक्षणं करणीयम् ।

राजा—किमुच्यते संरक्षणमिति । यतः—

---

१. 'शोचे' इति ख-पाठः. २. 'समामृजन्ति' इति ख-पाठः.

विश्वाधीशस्त्रिभुवनगुरुः सर्वगः सर्वशक्तिः
साक्षी साक्षान्निरवधिपरानन्दसंदोहकन्दः ।
लीलाबालः परमपुरुषः क्लेशकोषाद्यपेतः
कुक्षौ यस्य त्रिभुवनमिदं को नु तं त्रातुमीष्टे ॥१५॥

अपि च ।

एष क्रीडनकैः स्वयं विरचितैरस्मादृशैः क्रीडति
प्रज्ञाया निधिरैन्द्रजालिक इव व्यालादिभिर्मायिकैः ।
आत्मानं लघुवत्परांश्च गुरुवत्संदर्शयंल्लीलया
पुत्रभ्रातृसुहृत्सखिव्यतिभिदाभ्रान्त्याभितो भासते ॥ १६ ॥

देवकी—देव, स एष प्रेमोद्गारः ।

तथा हि—

जडोऽपि क्षीणोऽपि प्रकृतिकुटिलोऽपि प्रविगल-
त्कलोऽपि द्राग्दोषाकरवपुरपीशेन विधृतः ।
मृगाङ्कश्चेन्मौलौ द्विजपतिधिया तद्ध्रुवमहो
महोदराः प्रायो लघुमपि नयन्त्येव गुरुताम् ॥ १७ ॥

कृष्णः—(प्रविश्य सप्रश्रयमवनम्य ।) महाराज,

एतच्छीतरुचेर्मरीचिनिचयं स्रोतः सुरस्रोतसः
स्फूर्जद्बालमृणालजालकमिभाधीशस्य दन्तद्युति ।
निर्मोकं भुजगेश्वरस्यविशदं प्रालेयधारागृहं
पार्श्वस्थो विधुनोति चामरयुगं श्रीसिंहलाधीश्वरः ॥१८॥

रामः—महाराज,

अम्भोजं विजयश्रियो निलयनं शीतांशुबिम्बं दिवः
सेवायै प्रणतं सतोऽभ्रभवतो मूर्तं यशोमण्डलम् ।

स्फारस्फाटिकसौधमेतदमलं युष्मत्प्रतापार्चिषः
श्वेतच्छत्रमयं बिभर्ति निभृतं श्रीकामरूपेश्वरः ॥ १९ ॥

अपि च—

आस्ते कलिङ्गाधिपतिर्गजानां कोटीः प्रदाय प्रवहन्मदान्धाः ।
गौडेश्वरोऽपि प्रतिपाद्य सर्वं संसेवते संप्रति संप्रतीतः ॥ २० ॥

कृष्णः—कथं वा प्रतिपुरुषं निवेदयामः । [1]संक्षेपतोऽवधार्यताम्

त्वङ्गत्तुङ्गतुरंगपुंगवगलद्दानद्विपद्वीपजो-
दञ्चच्चारुपदार्थसार्थरमणीचञ्चन्मणीनां गणैः ।
क्षोणीपाः समुपासते परिजनान्विज्ञापयन्तो बहि-
र्द्वारे कोट्यधिका नतेस्वसरं लब्धुं दिगन्तागताः ॥२१॥

राजा—(सहर्षम् ।) वासुदेव, भवदनुगृहीतानां भवत्सहायान कियदेतत् ।

तथा हि—

येषां त्वं दयसे हरे कियदिदं तेषां कृपायाः फलं
राज्यप्राज्यगजादिसंपदियती खद्योतविद्योतिका ।
ब्रह्मेन्द्रादिपदानि यस्य करुणालेशानुषक्तेः फलं
यस्याः सर्वपुमर्थमस्तकमणेर्विघ्नाय सिद्ध्यष्टकम् ॥ २२ ॥

अपि च—

शीतं चन्दनचन्द्रिकापरिचयात्स्फीतं नभोमण्डला-
द्गीतं किंनरकामिनीपरिषदाघीतं सुधाम्भोधिना ।
उन्नीतं सकलोपकारकरणाद्धीतं परीवादतः
श्रीदामोदर किं भणामि भवतः सौजन्यजन्यं यशः ॥२३॥

---

१. 'अन्यदप्यवधार्यताम्' इति ख-पाठः.

तद्भवानेव सर्वानेतान्समागतान्यथोचिताचारचतुरवचनादिभिः स्वयमेव संभावयतु । किमत्रान्यैरुपदेष्टव्यम् ।

कृष्णः—यदादिशति महाराजः । (इति बहिर्निष्क्रम्य तोरणपरिसरे स्थित्वा दक्षिणं बाहुमुद्यम्योच्चैःस्वरम् ।) भो भो नानादिगन्तागताः ससामन्ताः सकलभूपालाः, सजानपदाः पौरजनाश्च, सावधानाः समाकर्णयत महाराजस्य श्रीमत उग्रसेनस्य शासनम् । यत्किल—

स्वेषु स्वेषु पदेषु तिष्ठत चिरान्नित्योत्सवैर्नन्दत
व्यावर्तध्वमनध्वनः परहितैर्मोदध्वमाध्वंपथि ।
राज्ञः शासनमाद्रियध्वमुचितं दद्धं पृथिव्याः करं
सेवध्वं विविधोपदाभिरनघं यद्यात्मनोऽभीप्सथ ॥ २४ ॥

(पुनः प्रविश्य ।) महाराज, यथादिष्टमनुष्ठितम् । आघोषितं च राजानुशासनं पुरनगरजनपदेषु । अनुकूलिताश्च प्रसाददानादिभिर्लोकपालाः, किं पुनर्भूपालाः । अधिकृताश्च पदे स्वामिहितैषिणो लोकाः । परितोषिताश्च सकलजनपदाः । किं ते भूयः प्रियमुपकरोमि ।

राजा—वासुदेव, किमतःपरमपि कर्तव्यमवशिष्यते ।

यतः—

उत्पत्तिप्रभृतिक्रमेण दितिजाः सर्वेऽपि निःशेषिताः
स्वर्बन्धः पितरौ वयं च निगडे बद्धाश्चिरान्मोचिताः ।
त्रातं गोकुलमिन्द्रतः प्रकुपिताद्दुद्धृत्य गोवर्धनं
प्राज्यं राज्यमकण्टकं भुजबलेनावर्ज्य मय्यर्पितम् ॥ २५ ॥

तथापीदमस्तु—

भूपालाः परिपालयन्तु विधिवद्धर्मेण वर्णाश्रमान्
पृथ्वी कामफला भवत्वविरतं वर्षन्तु काले घनाः ।

ईर्ष्यामुज्झतु दुर्जनः परगुणेष्वासज्जतां सज्जनः
सत्काव्यामृतवर्षिणीकविमुखे वाणी चिरं नन्दतु ॥ २६ ॥

अपि च—

साहित्यामृतसिन्धुसान्द्रलहरीनिर्व्याजमज्जन्मनो
मज्जानः परिशीलितामलकलामोदेन मेदस्विनः ।
उद्यत्काव्यकथाप्रबन्धमधुरद्राक्षासदृक्षाक्षराः
स्वैरं कंसवधं बुधाश्चिरतरं गायन्तु कृष्णानुगाः ॥ २७ ॥

कृष्णः—एवमस्तु ।

(इति विष्कान्ताः सर्वे ।)

इति सप्तमोऽङ्कः ।

काव्यमाला मासिकांत छापलेले ग्रंथ.

		किं. रु.	आ.	ट. रु.	आ.
१	आर्यासप्तशती—गोवर्धनाचार्यविरचित.... ...	१	४	०	४
२	काव्यालंकार—रुद्रटकृत, नमिसाधुकृत टीकासहित.	१	८	०	४
३	श्रीकण्ठचरितकाव्यम्—श्रीमङ्खकविकृत. ...	२	८	०	६
४	कर्पूरमञ्जरीसट्टक—राजशेखरकृत.	१	०	०	४
५	अनर्घराघव नाटक—मुरारिकृत.	२	०	०	४
६	कंसवधनाटक—पं० दुर्गाप्रसादकृत.... ...	०	८	०	२
७	कर्णसुन्दरीनाटिका—महाकविश्रीविल्हणकृत. ...	०	८	०	२
८	धर्मशर्माभ्युदयकाव्य—महाकविश्रीहरिचन्द्रविरचित.	१	०	०	४
१०	समयमातृकाकाव्य—क्षेमेन्द्रविरचित. ...	०	१०	०	२
११	कादम्बरीकथासारकाव्य—श्रीमदभिनन्दकृत.	०	१०	०	२
१२	रसगङ्गाधर—महाकविश्रीजगन्नाथपण्डितरायविरचित.	३	८	०	८
१३	साम्बपञ्चाशिका—साम्बकविप्रणीत.	०	४	०	१
१४	पारिजातहरणचम्पू—शेषकृष्णविरचित. ...	०	७	०	२
१५	काव्यालंकारसूत्राणि—वामनविरचित. ...	०	१२	०	३
१६	मुकुन्दानन्दभाण—श्रीकाशीपतिविरचित. ...	०	८	०	२
१७	उन्मत्तराघवप्रेक्षाणक—भास्करकविविरचित.	०	३	०	१
१८	अमरुशतक—अमरुककविविरचित.	०	१२	०	४
१९	सूर्यशतक—मयूरकविविरचित.	०	७	०	१
२०	लटकमेलकप्रहसन—शंखधरविरचित. ...	०	५	०	१
२१	गाथासप्तशती—हालोपनामकसातवाहनसंकलित.	३	०	०	१२
२४	काव्यप्रदीप—महामहोपाध्यायश्रीगोविन्दविरचित.	२	०	०	६
२५	ध्वन्यालोक—आनंदवर्धनाचार्यविरचित. ...	२	०	०	४
२६	दशावतारचरितकाव्य—क्षेमेन्द्रविरचित. ...	१	०	०	४
२७	जीवानन्दनाटक.	०	१२	०	३
२८	दूताङ्गदसंध्यानाटक—श्रीसुभटकविविरचित. ...	०	३	०	१
२९	भर्तृहरिनिर्वेदनाटक—श्रीहरिहरोपाध्यायकृत.	०	२॥	०	१

		किं.	रु.	आ.	ट.रु.	आ.
३०	**चन्द्रप्रभचरित**—महाकवि वीरनन्दिविरचित.		१	०	०	४
३१	**विष्णुभक्तिकल्पलता**—पुरुषोत्तमविरचित. ...		०	१०	०	१
३२	**सहृदयानन्दकाव्य**—कृष्णानंदविरचित. ...		०	१०	०	३
३३	**श्रीनिवासविलासचम्पू**—वेङ्कटेशकविप्रणीत.		०	१४	०	२
३६	**वृत्तिवार्तिक**—श्रीमदप्पय्यदीक्षितप्रणीत. ...		०	३	०	१
३७	**रससदनभाण**—युवराजकविविरचित.		०	८	०	२
३८	**चित्रमीमांसा**—श्रीमदप्पयदीक्षितप्रणीत. ...		१	०	०	३
३९	**विद्यापरिणय**—आनन्दरायमखिविरचित. ...		०	९	०	१
४०	**रुक्मिणीपरिणय**–श्रीरामवर्मवञ्चियुवराजविरचित.		०	६	०	२
४३	**काव्यानुशासन**—श्रीमद्वाग्भटविरचित.... ...		०	७	०	२
४४	**शृङ्गारतिलकभाण**—श्रीरामभद्रदीक्षितविरचित.		०	६	०	१
४६	**वृषभानुजानाटिका**—श्रीमथुरादासविरचित. ...		०	७	०	१
४८	**वाग्भटालंकार**—श्रीवाग्भटप्रणीत.		०	८	०	२
५०	**अलंकारशेखर**—श्रीकेशवमिश्रकृत.		०	१२	०	३
५१	**पतञ्जलिचरित**—श्रीरामभद्रदीक्षितप्रणीत. ...		०	१०	०	२
५२	**मन्दारमरन्दचम्पू**—कृष्णकविविरचित. ...		१	८	०	४
५३	**वाणीभूषण**—श्रीदामोदरमिश्रविरचित.... ...		०	८	०	१
५४	**धनंजयविजय**—श्रीकाञ्चनाचार्यविरचित. ...		०	३	०	१
५५	**अद्भुतदर्पणनाटक**—महादेवविरचित.		०	१२	०	२
५७	**राघवनैषधीयकाव्य**—हरदत्तसूरिकृत. ...		०	१०	०	१
५८	**शृङ्गारभूषणभाण**—वामनभट्टबाणविरचित. ...		०	३	०	१
५९	**अमृतोदयनाटक**—गोकुलनाथकृत.		०	८	०	२
६०	**युधिष्ठिरविजय**—महाकवि श्रीवासुदेवविरचित.		०	१२	०	४
६१	**हरचरितचिन्तामणिकाव्य**–राजानकजयरथकृत.		१	१२	०	४
६५	**भारतमञ्जरीकाव्य**—महाकविश्रीक्षेमेन्द्रविरचित.		५	०	०	१२

पांडुरंग जावजी,
निर्णयसागर छापखान्याचे मालक,
२६-२८, कोलभाट लेन, मुंबई नं० २

विक्रेयाणि संस्कृतपुस्तकानि ।

	मू. रू.	आ.
अद्भुतदर्पणनाटकम्—श्रीमहादेवकविविरचितम्. ...	·॥॰	८=
अभिज्ञानशाकुंतलनाटकम्—कालिदासकृतं—राघवभट्टकृत-अर्थद्योतनिकाटीकासहितम्.	१॥	·।॰
अमृतोदयनाटकम्—श्रीमद्दोकुलनाथकृतम्.	·॥॰	८-
अनर्घराघवनाटकम्—श्रीमुरारिकृतं, रुचिपत्युपाध्यायकृत-टीकासहितम्....	२	·॥॰
उत्तररामचरितम्—महाकविश्रीभवभूतिप्रणीतं, वीरराघवकृतया टीकया समेतम्.	१	८॥=
उन्मत्तराघवप्रेक्षाणकम्—भास्करकविविरचितम्. ...	८॥=	८-
कर्पूरमञ्जरीसट्टकम्-श्रीराजशेखरकृतं, वासुदेवकृतटीकासहितं **बालभारतनाटकं** च	१	·।॰
जीवानन्दम्—आनन्दरायमखिप्रणीतम्.	·॥॰	·।॰
कर्णसुन्दरी नाटिका—महाकविश्रीबिल्हणकृता.	·॥॰	८=
चैतन्यचन्द्रोदयं नाटकम्—श्रीकविकर्णपूरविरचितम्. ...	१॥	·।॰
दूताङ्गदं नाटकम्—श्रीसुभटकविविरचितम्.	८=	८॥
प्रसन्नराघवं नाटकम्—श्रीजयदेवकविविरचितम्. ...	·॥।=	८=
मृच्छकटिकं नाटकम्—पृथ्वीधरकृतया व्याख्यया समेतम्.	१॥	·।॰
मालविकाग्निमित्रं नाटकम्—कालिदासकृतं, काट्यवेमकृत-टीकासहितम्.	·॥।॰	८=
रत्नावली नाटिका—श्रीहर्षदेवकृता, गोविन्दकृतटीकासहिता.	१॥	·।॰
विद्यापरिणयः—आनन्दरायमखिविरचितः.	·॥८	८=
रुक्मिणीपरिणयं नाटकम्-श्रीरामवर्मवञ्चियुवराजकृतं....	·।=	८-
लटकमेलकप्रहसनम्—शंखधरविरचितम्.	·।८	८-
विदग्धमाधवम्—(नाटकं) श्रीरूपगोस्वामिप्रणीतम्. ...	१॥	·।॰
पार्वतीपरिणयनाटकम्—महाकविबाणभट्टप्रणीतम्. ...	·।८	८-
वृषभानुजा नाटिका—श्रीमथुरादासविरचिता.	·।=	८=
सत्यहरिश्चन्द्रनाटकम्—प्रबंधचतुरकर्तृमहाकविरामचंद्रकृतम्.	·॥॰	८=

पाण्डुरङ्ग जावजी—निर्णयसागराध्यक्षः,

पो० कालबादेवी, मुंबई.